॥ श्रीः ॥

श्रीपराशरभट्टार्यविरचितः

श्रीगुणरत्नकोशः ।

वात्स्यवीरराघवाचार्यकृतवसुराश्याख्य-

व्याख्यानेन सहितः

भाषाटीकया विभूषितश्च.

गङ्गाविष्णु श्रीकृष्णदास,

मालिक–" लक्ष्मीवेङ्कटेश्वर " स्टीम् प्रेस,

कल्याण–मुंबई.

संवत् १९८६, शके १८५१.

श्रीः ॥

श्रीगुणरत्नकोशः ।

व्याख्याद्वयसहितः ।

श्रीमते रामानुजाय नमः ।

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

व्याख्यातृ प्रतिज्ञा ।

श्रीगुरुपंक्तिपादसरसीरुहसंविनतः
श्रीगुणरत्नकोशविवृतिं वसुराश्यभिधाम् ।
श्रीनगदेशिकेन्द्रतनयः शुभवात्स्यकुलः
श्रीयुतवीरराघवगुरुर्वितनोतितराम् ॥
श्रीमन्महाहरितवंशविशुद्धवृत्त-
मुक्तामणिः सकलशास्त्रविदग्रगण्यः ।
भट्टारको विरचयन् गुणरत्नकोशं
स्तोत्रं श्रियो नमति तामिह विघ्नशान्त्यै ॥

अवतारिका—श्रीमत्कूरकुलपयःपारावारसुधाकरश्रीमद्रामानुजमुनीन्द्रकृपाल-
...श्रीभाष्यादिप्रबन्धपरिचयमहिमोल्लासबुद्धिः द्रविडोपनिषद्गभीराशयविवरणश्रीरङ्ग-
राजकमलापतिलालितः श्रीरङ्गनाथदिव्याज्ञालब्धपराशरभट्टारकनामधेयः कैशिक-
पुराणश्रवणसमुदितमहिमोल्लासभासुररङ्गरमणकरुणाप्रसादसमासादितब्रह्मरथवैभवः
यतिवरचरणाम्भोरुहप्रवणान्तेवासिजनाग्रेसरकूरेशतनूभवः सकलशास्त्रविदग्रेसरः
श्रीभट्टाख्यदेशिकः निखिलजगदुदयविभवलयलीलाशालिभगवत्प्रापकभूतां श्रियं
...कृतमहोपकारातिशयानुसन्धानेन दयावात्सल्यादिगुणातिशयपरिशीलनेन स्तोतु-
...मः प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारपरम्पराप्राप्तं मङ्गलमाचर-
...न् स्तौति—

...तारिका—श्रीमत्कूरकुल अंभोधिके आल्हादक चंद्रमा सदृश तथा ...नुजमुनींद्रकी कृपासे प्राप्त श्रीभाष्यादि ग्रंथोंके गूढभावार्थ महिमाकी ...में है बुद्धि जिनकी और द्रविडोपनिषदके गंभीर आशयके विवरण करनेसे लक्ष्मीपति श्रीरंगराजने लालन (प्यार) किया है जिनको ऐसे,

तथा श्रीरङ्गनाथके दिव्य आज्ञासे प्राप्त पराशरभट्टारक नामवाले, तथा कैशिक पुराणके श्रवणसे उत्पन्न महिमाके प्रकाशवाले श्रीरंगरमणके करुणा प्रसादसे प्राप्त भया है ब्रह्मरथवैभव अर्थात् श्रीरंगनाथने पराशरभट्टाचार्यके मुखसे कैशिक-पुराणकी कथा सुनकर, श्रीरंगनाथने अपने बैठनेके विमानपर (जिसको ब्राह्मण लोग बडे बहुमानके साथ ढोवते हैं ऐसे अपने बैठनेके योग्य विमानपर) परा-शरभट्टार्यको बैठाकर अपने सदृश बहुमान किये हैं ऐसे, तथा श्रीयतिराज (रामानुजस्वामी) के चरणारविंदके प्रेमी शिष्यजनोंमें अग्रेसर जो कूरेश-स्वामी :तिनके पुत्र ऐसे सकलशास्त्रवेत्ताओंमें अग्रेसर श्रीभट्टाख्यदेशिकने समस्त जगत्के उत्पत्ति पालन संहाररूप लीलाशाली भगवान् नारायणकी प्राप्ति करानेवाली श्रीजीकी तिनके किये भये महान् उपकारोंको अनुसंधान करके दया वात्सल्यादि गुणोंका कथन पूर्वक, स्तुतिकी इच्छासे प्रारंभ किये भये ग्रंथकी निर्विघ्न परिसमाप्तिके अर्थ शिष्टाचार परंपरासे प्राप्त मंगलाचर-पूर्वक स्तुति करते हैं—

श्रियै समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥ १ ॥

श्रिया इति । हरेः हरति परिहरति स्वासंश्लिष्टान् करोति पाप्मन इति हरिः "अपहतपाप्मा" इति श्रुतेः । अनेन हेयगुणप्रतिभटत्वमुक्तं भवति । हरत्या-श्रितपापानीति वा हरिः "हरिर्हरति पापानि" इति स्मृतेः । अनेन संश्रितानां स्वप्राप्तिविरोधिसर्वपापहरणोक्त्या मोक्षप्रदत्वं पापहरणस्य तज्ज्ञानतन्निवर्तक-कृपाक्षमादिसापेक्षत्वेन कल्याणगुणाकरत्वञ्च फलितम् । हरति सर्वं स्ववशीकरो-तीति वा हरिः "सर्वस्य वशी "यत्र कामगमो वशी" इति श्रुतिस्मृत्योस्स-द्भावात् । वशीत्यस्य 'सर्वं वशे यस्य स वशी' इति श्रुतप्रकाशिकाचार्यैर्व्याख्यानं कृतम् । अनेनोभयविभूतियोगः फलितः ॥ "हरिꣳहरन्तमनुयन्ति देवाः" "ब्रह्माणमीशं रुद्रञ्च यमं वरुणमेव च । प्रसह्य हरते यस्मात्तस्माद्धरिरिहोच्यते ॥" इति श्रुतिनिर्वचनाभ्यां भगवतस्सर्वस्मात्परत्वं सर्वदेवनियन्तृत्वञ्च सिद्धम् । तस्य समस्तचिदचिद्विधानव्यसनम् अत्र चिदचिच्छब्दाभ्याम् 'अचिदविशेषितान् प्रलयसीमनि संसरतः करणकलेवरैर्घटयितुं दयमानमनाः । वरद निजेच्छयैव पर-वानकरोः प्रकृतिम्महदभिमानभूतकरणावलिकोरकिणीम् ॥" इत्युक्तसृष्टियोग्य-संसारिचेतनमिश्रसत्त्वे गृह्येते । समस्तशब्देन ब्रह्मादिपिपीलिकान्तं चेतनजातं

चतुर्विंशतितत्त्वात्मकं प्रकृतितत्कार्यजातं च विवक्षितम्, तेषां समस्तचिदचितां विधानं करणकलेवरयोजनलक्षणा तदर्थं महदहङ्कारभूतकरणग्रामोत्पादनलक्षणा च सृष्टिः, स्थितिलययोरप्येतदुपलक्षणम् । यद्वा समस्तचिदचितां बद्ध-मुक्तनित्यरूपाणां चेतनानां शुद्धसत्त्वमिश्रसत्त्वसत्त्वशून्यलक्षणानामचेतनानां च विधानम् "इच्छात एव तव विश्वपदार्थसत्ता नित्यं प्रियास्तव तु केचन ते हि नित्याः" इति श्रीवत्साङ्कश्रीसूक्तिप्रकारेण भगवतो नित्येच्छया नित्य-सूरीणां नित्यासङ्कुचितज्ञानतया सङ्कल्पनम्, मुक्तानामाविर्भूतापहतपाप्मत्वादि-गुणाष्टकतया सङ्कल्पनम्, बद्धानां करणादिप्रदानकर्मतारतम्यज्ञानोत्पाद-नादि च, एवं चेतनविषये विधानं वेदितव्यम् । अचेतनविषये तु शुद्धसत्त्वस्य स्वेच्छया नित्यविभूतौ विमानगोपुरमण्डपप्रासादिरूपेण परिण-मयितृत्वम् । मिश्रसत्त्वस्य संसारिचेतनान्प्रति भोग्यभोगोपकरणभोगस्थानरूपेणा-ण्डतदावरणचतुर्दशभुवनसमस्तदेहेन्द्रियादिरूपेण चोत्पादनम् । सत्त्वशून्यस्य कालस्य चेतनकर्मानुगुण्येन कलाकाष्ठामुहूर्तयामदिनपक्षमासायनसंवत्सरादिरूपेण परिणमयितृत्वञ्च विधानम् । तत्र व्यसनमभिनिवेशमायासं वा । अङ्गीकार एषामस्तीत्यङ्गीकारिणः तैरङ्गीकारसूचकैरित्यर्थः । आलोकैः कटाक्षैः "स्मितवि-कसितगण्डं व्रीडविभ्रान्तनेत्रं मुखमवनमयन्ती स्पष्टमाचष्ट सीता" इति-वन्नयनलीलयैवाङ्गीकारस्सूच्यते' न तु "पूर्णोक्तादक्षिणापथाः" इतिवदेवमेव कार्यमिति स्पष्टोक्तयेत्यर्थः । सार्थयन्त्यै स्वानुमोदेन सफलं कुर्वत्यै । स्वानुमोदा-जनने हरेर्जगत्सृष्ट्यादिलीला विरसा स्यात् । तदुक्तं श्रीस्तवे "क्रीडेयं खलु नान्यथास्य रसदा स्यादैकरस्यात्तया" इति । अनेन भगवत एव जगज्जन्मा-दिकारणत्वम्, श्रियस्तु तदनुमोदेन तद्रुत्तंभकत्वमात्रं सूचितम् । एवं परत्वमुक्तम् । सौलभ्यमाह—श्रिया इति । श्रियै तत्पुरुषार्थलाभाय सर्वसंश्रयणीयायै श्रीरङ्गनायक्यै । अत्र श्रीशब्दस्य षोढा व्युत्पत्तिर्द्रष्टव्या, ततो घटकत्वसिद्धिः । व्युत्पत्तिषट्कञ्च मदीये श्रीगुणसुधासारलहरीस्तोत्रे प्रदर्शितम्—"श्रितास्यन्यैस्सर्वैः श्रयसि रमणं संश्रितगिरः शृणोषि प्रेयांसं श्रितजनवचः श्रावयसि च । शृणास्येतद्दोषाञ्जननि ! निखिलान्सर्वजगतीं गुणैः श्रीणासि त्वं तदिह भवतीं श्रीरिति विदुः ॥" इति । अञ्जलिः स्वशेषत्वसूचकस्सुकरः क्षिप्रप्रसादहेतुश्च "अञ्जलिः परमा मुद्रा क्षिप्रं

देवप्रसादिर्नो " इत्युक्तेः। कृतः कृतो भवति। मयेति शेषः। अत्र हरेः समस्तचिदचिद्विधानव्यसनमालोकैस्सार्थयन्त्या इति वस्तुना यथा कस्यचित्प्रभोः प्रीत्यै केनचिन्प्रयत्नसाध्ये कर्मणि कृते प्रभुणा तद्दर्शनतदनुमोदने कर्तुर्महानन्दो भवति, तथा समस्तचिदचिद्विधानव्यसनिनो हरेरपि तत्प्रयत्ने श्रिया दर्शनेनानुमोदिते तस्यापि महानन्दो भवतीति वस्तु ध्वन्यत इत्यस्य स्तोत्रस्योत्तमत्वं सूचितम्। "ध्वनिप्रधानता यत्र तदुत्तममुदाहृतम्" इति लक्षणात्। अञ्जलिरिति कमलमुकुलाकारकरतलयुगलयोगरूपाञ्जल्युक्त्या कायिकनमस्कारः कृत इति वाचा तदनुवादेन वाचिकनमस्कारः "मनः पूर्वो वागुत्तरः" इति मनः प्रसरणपूर्वकत्वाद्वाचो मानसिकनमस्कारश्च कृत इति मन्तव्यम्। मङ्गलारम्भसंभवाय स्तोत्रादौ श्रीशब्दप्रयोगः। "देवतावाचकाश्शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्यास्युर्लिपितो गणतोऽपि वा॥' इत्युक्तेरादौ रोगफलकजगणप्रयोगदोषो नेति ध्येयम्॥ १॥

भाषाटीका—इस श्लोकमें प्रथम हरिशब्दका विवरण करते हैं कि "अपहतपाप्मा" इस श्रुतिप्रमाणसे जो अपनेसे पापोंको दूरकरे सो हरि, इससे हेयप्रतिभटत्व सिद्ध भया। अथवा "हरिर्हरति पापानि" इस स्मृतिप्रमाणसे जो आश्रितोंके पापोंको दूरकरे सो हरि, इससे आश्रितोंको अपनी प्राप्तिका विरोधी सर्व पापहरणत्वकी उक्तिमें मोक्षप्रदत्व और पापहरण करनेके लिये उन सब पापोंका ज्ञान और उसको निवृत्तिके लिये कृपा क्षमादि गुणोंकी अपेक्षा होनेसे कल्याणगुणाकरत्व सिद्ध भया। अथवा सबको हरणकरे अपने वशमें करे सो हरि, "सर्वस्य वशी, यत्र कामगमो वशी" इस श्रुति स्मृति प्रमाणसे सब चराचरजात जिसके वशमें रहें सो वशी, इस योजनासे उभय विभूति नियामकत्व सिद्ध भया। "हारि ७ हरंतमनुयन्ति देवाः' 'ब्रह्माणमीशं रुद्रं च यमं वरुणमेव च। प्रसह्य हरते यस्मात्तस्माद्धरिरिहोच्यते॥" इस श्रुति और निर्वचनसे भगवान्को सबसे परत्व और सर्वदेवोंको नियामकत्व सिद्ध भया। ऐसे हरिके समस्त चित (चेतन) अचित् (प्रकृति) की सृष्टिरूप व्यसन अर्थात् इहां चित् अचित् शब्दकरके "अचिदविशेषितान्प्रलयसीमनि संसरतः करणकलेवरैर्घटयितुं दयमानमनाः। वरद निजेच्छयैव परवानकरोः प्रकृतिं महदभिमानभूतकरणावलिकोरकिणीम्" इस उक्तिसे सृष्टिके योग्य संसारी चेतन और मिश्र सत्त्व दोनोंको ग्रहण करते हैं समस्तशब्द करके ब्रह्मासे लेकर

पिपीलिका (चेंटी) पर्यंत चेतनसमूह और चतुर्विंशति तत्त्वात्मक (चौवीस तत्त्ववाली) प्रकृति तिसके कार्य (व्यष्टिरूप) जगत्का विधान नाम करण-कलेवरादि प्रदान, तिसके अर्थ महत्तत्त्व अहंकार पंचभूत इंद्रियादिकोंकी उत्पत्ति लक्षणवाली सृष्टि करना, अथवा बद्ध, मुक्त, नित्यरूपवाले चेतनोंका और शुद्धसत्त्व, मिश्रसत्त्व, सत्त्वशून्य लक्षणवाला अचेतन तिसका विधान अर्थात् नित्यसूरियोंको नित्य असंकुचित ज्ञानका (जिस ज्ञानका कभीभी संकोच न हो) संकल्प करना, मुक्तोंको अपहतपाप्मत्वादि गुणोंका आविर्भावपूर्वक स्वस्वरूपकी प्राप्तिका संकल्प करना, बद्धोंको करणकलेवारादि प्रदान और कर्मतारतम्य ज्ञान उत्पन्न कराना, इस प्रकार चेतन विषयमें विधान (सृष्टि) जानना । और अचेतन विषयमें विधान यह है कि, शुद्धसत्त्वको अपने इच्छाहीसे परंपद (त्रिपाद्विभूति) में विमान, गोपुर, मंडप, प्रासादादि रूपसे परिणाम (वृद्धि) कराना । और मिश्रसत्त्वको संसारी चेतनोंके लिये भोग्य (शब्दादि विषय) भोगोपकरण (शरीर इंद्रियादि) भोगस्थान (स्वर्गादि) रूप करके सप्तावरणसहित ब्रह्मांड तदंतर्गत चतुर्दशभुवन (तिसके भीतर चौदहभुवन) और चेतनोंके कर्मानुगुण देह इंद्रियादि रूप करके उत्पन्न कराना, तथा सत्त्वशून्य (काल) को समस्त चेतनोंके कर्मानुगुण कला, काष्ठा, मुहूर्त्त, प्रहर, दिन, पक्ष, मास, ऋतु, उत्तरायणादि षण्मास, संवत्सरादिरूप करके परिणाम कराना । इस प्रकार हरिको समस्त जगत्सृष्टिके व्यसन नाम परिश्रमको जो लक्ष्मीजी, अंगिकारको सूचन करानेवाले कटाक्षों करके अपने अनुमोदनसे सफल करती ह तिन श्री नामवाली अर्थात् श्रीशब्द छः व्युत्पत्तियोंसे सिद्ध हैं सोई श्रीगुणसुधासारलहरी ग्रंथमें कहाभी है कि " श्रितास्यन्यैः सर्वैश्श्रयासि रमणं संश्रितगिरः शृणोषि प्रेयांसं श्रितजनवचः श्रावयासि च । शृणास्येतद्दोषाञ्जननि निखिलान्सर्वजगतीं गुणैः श्रीणासि त्वं तदिह भवतीं श्रीरिति विदुः " इसका अर्थ यह है कि, हे अंब ! सब जगत् आपका आश्रयण करता है और आप अपने रमण नारायणका आश्रयण करती हो और आश्रितोंके विज्ञापनको सुनती हो तथा अपने प्रियतम भगवान्को आश्रितोंकी प्रार्थना सुनाती हो और आश्रितोंके दोषोंको नाश करती हो समस्त जगत्को अपने गुणोंसे वृद्धि करती हो इसीसे तत्त्वदर्शीलोग आपको श्री कहते हैं इस प्रकार श्रीशब्दकी छः व्युत्पत्ति है । ऐसी श्रीजीके लिये मैं "अंजलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी " शीघ्र देवको प्रसन्न करनेवाली अंजलि (हाथ जोडना) करता हूं । इस स्तोत्रमें इस श्लोकके आदिमें श्रीशब्दका प्रयोग

मंगलके अर्थ है “ देवतावाचकाश्शब्दा येच भद्रादिवाचकाः । ते सर्वे नैव निंद्याः स्युर्लिपितो गणतोपि वा ” इस उक्ति प्रकारसे रागादिफलोंको देनेवाले जगणादि देवतावाचक मंगलादि वाचक शब्द दूषित नाहीं हैं ॥ १ ॥

महाप्रबन्धनिर्माणे विघ्नभूयस्त्वशङ्कया तन्निवृत्त्यै मङ्गलबाहुल्याय देवतावशीकरणे सुकरोपायं नमस्कारात्मकमङ्गलान्तरमाचरति –

बडे ग्रंथके निर्माणमें बहुत विघ्नोंकी आशंका होती है तिसकी निवृत्तिके लिये और मंगलवृद्धिके अर्थ देवताको वशकरनेमें सुलभ उपाय नमस्कारात्मक मंगलाचरण इस श्लोकमें करते हैं–

उल्लासपल्लवितपालितसप्तलोकीनिर्वाहकोरकितनेमकटाक्षलीलाम् ।
श्रीरङ्गहर्म्यतलमङ्गलदीपरेखां श्रीरङ्गराजमहिषीं श्रियमाश्रयामः २॥

उल्लासेति । अत्र उल्लासपदान्वयाय सप्तलोक्या इति षष्ठ्यन्तं पदं लभ्यते । तथा च सप्तलोक्या उल्लासेन उदयेन पल्लविता सञ्जातपल्लवा, पालिताया रक्षितायास्सप्तलोक्या, निर्वाहेण स्थित्या, कोरकिता सञ्जातकोरका, पल्लवितकोरकितेत्युभयत्रापि “तदस्य सञ्जातम् ” इति तारकादित्वादितच्प्रत्ययः । नेमकटाक्षोऽर्धवीक्षणम्, “ नेम इत्यर्धे ” इतिसिद्धान्तकौमुद्याम् । तस्य तथाभूता लीला विलासो यस्यास्ताम् । उल्लासपल्लवितेत्येनेन लक्ष्मीकटाक्षलीलाया जगदुत्पत्तिप्राक्कालापेक्षया भूयस्त्वम् । निर्वाहकोरकितेत्यनेनोत्पन्नजगत्स्थितिजनितहर्षेण ततोपि भूयस्त्वञ्च गम्यते । अनेन लक्ष्म्या जगदुत्पत्तिस्थितिप्रयोजकत्वमुक्तम् । ततः परत्वं फलितम् । सौलभ्यमाह–श्रीरङ्गेति।श्रीरङ्गे दिव्यनगरे हर्म्यतलस्य दिव्यविमानप्रदेशस्य श्रीरङ्गाख्यदिव्यविमानप्रदेशस्य वा मङ्गलदीपरेखां शोभनदीपकलिकामिव श्रीरङ्गविमानान्तःप्रकाशिकामिति भावः । मङ्गलेत्यनेन अनुष्णत्वद्योतनात्प्रसिद्धदीपापेक्षया व्यावृत्तिः । दीपरेखामित्यौज्ज्वल्यञ्च द्योत्यते । श्रीरङ्गराजमहिषीं श्रीरङ्गराजेन सह विश्वरक्षणे कृताभिषेकाम् । “ कृताभिषेका महिषी ” इत्यमरः। श्रियं सर्वसमाश्रयणीयां लक्ष्मीम् आश्रयामः शरणं गच्छामः॥ कटाक्षलेशलीलाकल्पितजगदुत्पत्तिस्थितिकां सर्वसंश्रयणीयत्वाय श्रीरङ्गे कृतनित्यवासां श्रीरङ्गेश्वरवल्लभाम् । अत एव श्रियं शरणं गच्छाम इति भावः । अत्र सप्तलोक्युत्पत्तिस्थित्योर्लक्ष्मीनेमकटाक्षलीलापल्लवकोरकत्वरूपणात् कटाक्षलीला-

लतात्वमर्थसिद्धमिति सावयवरूपकमलङ्कारः।एकदेशरूपणे सर्वरूपणमप्यर्थसिद्धम् । “ प्रौढमौक्तिकरुचः पयोमुचां बिंदवः कुटजपुष्पबन्धवः । विद्युतां नभसि नाट्यमण्डपे कुर्वते स्म कुसुमाञ्जलिश्रियः ॥ ' इत्यत्र पयोमुचां बिन्दवो नभसि नाट्यमण्डपे कुसुमाञ्जलिश्रियः कुर्वत इत्यनेन विद्युतां नटीनामित्यर्थसिद्धमिति साहित्यचिन्तामणिकारोक्तेः । श्रीरङ्गहर्म्यतलमङ्गलदीपरेखामित्यत्र निरवयवरूपकमलङ्कार इति सावयवनिरवयवरूपकयोस्संसृष्टिः । “ भेदेनावस्थितिर्येषां सा संसृष्टिरुदाहृता ” इति लक्षणात् ॥ २ ॥

सप्तलोकीका उल्लास अर्थात् उदय होनेसे पल्लवित नाम उत्पन्नपल्लववाली और पालित जो सप्तलोकी तिसको निर्वाह नाम स्थितिकरके मुकुलित कलीवाली आधे कटाक्षकी लीला है जिनकी ऐसी, तथा जो श्रीरंगविमानप्रदेशको प्रकाशकरनेवाली मंगलदीपरेखा सदृश ऐसी श्रीरंगराजमहिषी अर्थात् श्रीरंगनाथकी पटरानी श्रीजी (स्वव्यतिरिक्त सब जगत्से सेव्य लक्ष्मी) की हम शरणागति करते हैं । इस श्लोकमें पूर्वार्द्ध करके लक्ष्मीजीको जगदुत्पत्तिस्थितिके हेतु होनेसे परत्व फलित भया और श्रीरंगराजमहिषी इस उक्तिसे सबके समाश्रयणकरनेके लिये श्रीरंगनगरमें नित्यनिवास करनेसे सौलभ्य फलित भया२॥

अथ मङ्गलभूयस्त्वसिद्ध्या एव श्लोकद्वयेन स्वस्मिँल्लक्ष्मीकटाक्षप्रार्थनेनाशीर्वादमङ्गलमाचरति—

इसके अनंतर मंगलसिद्धिकी प्रार्थना करिके अब दो श्लोकोंसे कल्पलतिका सदृश लक्ष्मीजीकी अपने विषय कटाक्ष प्रार्थना द्वारा आशिर्वाद मंगलाचरण करते हैं—

अनुकलतनुकाण्डालिङ्गनारम्भशुंभत्प्रतिदिशभुजशाखश्रीसखानोकहर्द्धिः । स्तननयनगुलुच्छस्फारपुष्पद्विरेफा रचयतु मयि लक्ष्मीकल्पवल्लीकटाक्षान् ॥ ३ ॥

अनुकलेति । अनुकलमनुक्षणम् इदं शुंभदिति प्रकाशनेऽन्वेति । तनुः कश्ण्ड इव तनुकाण्डः काण्डो दण्डः “काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु” इत्यमरः । तस्य तनुकाण्डस्यालिङ्गनारम्भेण, तनुकाण्डेनालिङ्गनारम्भे वा शुम्भन्ती प्रकाशमाना । दिशासु दिशासु प्रतिदिशम् । “ अव्ययं विभक्ति०” इति सप्तम्यर्थेऽव्ययीभावः । सर्वासु दिशास्वित्यर्थः । भुजाः

शाखा इव भुजशाखाः । प्रतिदिशं भुजशाखा यस्य स तथोक्तः । श्रियः सखा श्रीसखः । "राजाहस्सखिभ्यष्टच्" इति टच्प्रत्ययान्ततया श्रीसखशब्दोऽकारान्तः । श्रीसखः अनोकह इव श्रीसखानोकहः । प्रतिदिशभुजशाखश्चासौ श्रीसखानोकहश्च स तथोक्तः तस्य ऋद्धिर्ज्ञानशक्त्यादीनामात्मगुणानामौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्यादीनां विग्रहगुणानाञ्च संपत् । अनुकलतनुकाण्डालिङ्गनारम्भशुम्भन्तो प्रतिदिशभुजशाखश्रीसखानोकहर्द्धिर्यस्यास्सेति बहुव्रीहिः । स्वालिङ्गनारम्भप्रतिकलप्रकाशमानभगवत्स्वरूपरूपगुणसमृद्धिरित्यर्थः । लक्ष्मीतनोः काण्डौपम्यादार्जवं सूचितम् । प्रतिदिशशब्देन भगवद्भुजेषु चतुष्ट्वं भुजाः शाखाः इवेत्यनेन भुजानां शाखौपम्यादायतत्वं सूचितम् । श्रीसख इत्यनेन सर्वस्मात्परत्वम् अनोकह इत्यनेन श्रीतनुकाण्डालिङ्गनसुखजनितं वैवश्यञ्च द्योतितम् । भगवतः श्रीसख इति रूढया श्रियो भगवत्स्वरूपनिरूपकत्वेन च प्रयोगः । अनोकह इति भगवत आनन्दनिर्भरत्वेन स्तब्धतयावस्थानाद्वृक्षौपम्यम् "वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः" इति श्रुतेः । भवाध्वश्रान्तविश्रान्तिपदत्वेन वा वृक्षौपम्यम् "वासुदेवतरुच्छाया नातिशीता न घर्मदा" इति स्मृतेः । एवं लक्ष्म्या विग्रहसौन्दर्यं स्वाधीनपतिकत्वञ्चोक्तम् । अथावयवसौन्दर्यमाह—स्तननयनेति । स्तनौ च नयने च स्तननयनं गुलुच्छौ गुच्छौ स्फारपुष्पयोर्विकचपुष्पयोर्द्विरेफौ भ्रमरौ स्फारपुष्पद्विरेफौ गुलुच्छौ च स्फारपुष्पद्विरेफौ च गुलुच्छस्फारपुष्पद्विरेफं स्तननयनं गुलुच्छस्फारपुष्पद्विरेफमिव यस्यास्सा तथोक्ता । स्तनयोः गुलुच्छौपम्येन सौन्दर्यम्, नयनयोः स्फारपुष्पौपम्येन विकासो वैपुल्यञ्च गम्यते । कनीनकयोर्द्विरेफौपम्येन नैल्यस्निग्धते द्योतिते । लक्ष्मीः कल्पवल्लीव लक्ष्मीकल्पवल्लीपुष्पादितुल्यावयवयोगेन सर्वाभीष्टप्रदत्वेन च लक्ष्म्याः कल्पवल्ल्यौपम्यम् । मयि स्तुत्युद्यते । कटाक्षान् रचयतु मां कटाक्षलक्ष्यं करोत्वित्यर्थः । अत्र इवेत्युपमावाचकाप्रयोगाद्वाचकलुप्तोपमालङ्कारः । नन्वत्र तनौ काण्डत्वरूपणं तदालिङ्गनारम्भशोभिषु श्रीसखभुजेषु नानादिग्व्यापिशाखात्वरूपणं तद्वति श्रीसखे वृक्षत्वरूपणं स्तनयोर्गुलुच्छत्वरूपणं सतारकनयनयोस्सभ्रमरविकचपुष्पत्वरूपणं लक्ष्म्यां कल्पवल्लीत्वरूपणं चेति सावयवरूपकमेवालङ्कारोऽस्तु स्फुटत्वाचारुतातिशयावहत्वाच्चेति चेन्न; अर्थबाधस्फुटत्वचारु-

तातिशयावहत्वयोरकिञ्चित्करत्वात्, लक्ष्मीकल्पवल्लीकटाक्षान्रचयत्वित्यत्र लक्ष्म्यां कल्पवल्लीत्वरूपणे कल्पवल्ल्याः कटाक्षरचनानुपपत्तेः । न हि लक्ष्म्या इव कल्पवल्ल्याः कटाक्षास्संभवंति स्थावरजातीयत्वान्न च कल्पवल्ल्यास्सर्वफलप्रदत्वेन कटाक्षरचनमपि युज्यत इतिवाच्यम् । विचित्रवसनाभरणाद्यपेक्षितप्रदत्वेऽपि तस्याः कटाक्षसद्भावे मानाभावादिति दिक् । न च तदुपपत्त्यै परिणाम एवात्रालङ्कारोऽस्त्विति वाच्यम्, तनुकाण्डेत्यादिसर्वविशेषणवैयर्थ्यप्रसङ्गात् । लक्ष्मीकल्पवल्लीति विशेष्यमात्रे कटाक्षरचनौचित्याय परिणामप्राप्तेः । तस्माद्वाचकलुप्तोपमैवालङ्कार इतितत्त्वम् ॥ ३ ॥

अनुक्षण (निरंतर) लक्ष्मीजोकी तनुयष्टि अर्थात् श्रीविग्रहके आलिंगनके आरंभकरके सुशोभित हैं सब दिशाओंमें भुजशाखा जिनकी, ऐसे श्रीजीके सखा जो नारायणरूप वृक्ष तिनकी ऋद्धि नाम संपत् अर्थात् भगवान्का ज्ञानशक्त्यादि आत्मगुण और औज्वल्य सौन्दर्य सौगंध्य सौकुमार्य लावण्यादि विग्रहगुणोंको जो श्रीजो समृद्धि हैं । ऐसी, इससे लक्ष्मीजोका विग्रहसौंदर्य और स्वाधीनपतिकत्व (पति जिसके अधीनहो) सिद्ध भया, अब अवयव सौंदर्य कहते हैं गुच्छसदृश स्तनवाली भ्रमरसहित विकसितपुष्प सदृश नेत्रवाली ऐसी पुष्पतुल्य अवयववाली आश्रितोंके सब मनोरथको पूर्ण करनेवाली कल्पलतिका लक्ष्मी हमारे विषय स्तुतिकरनेके योग्य कटाक्ष करो अर्थात् उपरोक्त विशेषणवाली श्रीजीके कृपाकटाक्षसेही हमारेमें वक्तृत्वशक्ति हो सकती है अन्यथा नहीं ॥ ३ ॥

भगवतस्स्थावरजङ्गमतरतमभावसृष्टिनियामकभ्रूविक्षेपा श्रुतिशिरसामपि परतत्त्वसंशयनिवर्तकपदरागा स्वभोगोपक्रमलीलाल्पीकृतभगवद्वैश्वरूप्यविभवा लक्ष्मीस्सुधातरङ्गान्तरङ्गैरपाङ्गैरस्मानभिषिञ्चत्वित्याशास्ते—

भगवानकी जगत् सृष्टिमें स्थावर जंगमका तरतमभावके नियमनमें भ्रूविक्षेप हैं हेतु जिनका और उपनिषदोंके विषय तत्त्वसंशयको छेदन करनेवाला है चरणचिह्न जिनका और अपने भोगविलासके प्रारंभमें स्वाधीन करलिया है भगवानका विश्वरूप वैभवको जिन्होंने ऐसी लक्ष्मी अपनी अमृततरंगरूप कटाक्षों करके हमलोगोंको अभिषेक करो, ऐसा इस श्लोकमें कहते हैं—

यद्भ्रूभङ्गाः प्रमाणं स्थिरचररचनातारतम्ये मुरारे—
र्वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरान्ति ।

भोगोपोद्घातकेलीचुलुकितभगवद्वैश्वरूप्यानुभावा
सा नः श्रीरास्तृणीताममृतलहरिधीलङ्घनीयैरपाङ्गैः ॥४॥

यद्भ्रूभङ्गा इति । मुरारेः मुरद्विषः श्रीरङ्गराजस्य स्थिरचररचनातारतम्ये स्थावरजङ्गमसृष्टिनीचोच्चभावे । स्थावरसृष्टौ नीचोच्चभावः—कल्पवृक्षचन्दनरसालाश्वत्थनारिकेलाद्यपेक्षया स्नुहिबुर्बूरार्ककण्टकिद्रुमाणां नीचभावस्तत्प्रतियोगिनामुक्तानां कल्पवृक्षादीनामुच्चभावः । चरसृष्टिनीचोच्चभावस्तु देवापेक्षया मनुष्याणां मनुष्येषु च ब्राह्मणापेक्षया क्षत्रियाणां तदपेक्षया वैश्यानां तदपेक्षया शूद्रादीनां नीचभावः तदपेक्षया तिरश्चां तेष्वपि हंसगरुडशुकसारिकामयूरकोकिलाद्यपेक्षया कङ्कगृध्रकाकघूकादीनां नीचभावस्तत्प्रतियोगिनामुक्तानां देवादीनामुच्चभावश्चेतिबोद्धव्यम्। तत्र यस्याः लक्ष्म्याः भ्रूभङ्गाः भ्रविक्षेपाः प्रमाणं नियामकाः श्रीभ्रूभङ्गतारतम्यं दृष्ट्वा हरिः स्थावरजङ्गमात्मकं जगत्तरतमभावेन सृजतीति भावः । श्रीभ्रूभङ्गतारतम्ये च तत्तत्कर्मतारतम्यं हेतुरिति. श्रियो वैषम्यनैर्घृण्यप्रसङ्गः । भ्रूभङ्गाः प्रमाणमित्यनेन धातुर्जगत्सृष्टौ यथा वेदाःप्रमाणं तथा भगवतोऽपि स्थिरचररचनातारतम्ये श्रीभ्रूभङ्गाः प्रमाणमिति भावः । वेदान्ताः उपनिषदः तत्त्वचिन्तां ब्रह्मा शिवो विष्णुर्वा परतत्त्वमिति संशयम् मुरभिदुरसि श्रीरङ्गेशवक्षसि यत्पादचिह्नैः यस्याः श्रियः पादचिह्नैः पादालक्तकाङ्कैः । तरन्ति निरतिशयदीप्त्यापादकश्रीपदमुद्रितश्रीरङ्गराज एव परतत्त्वमिति निर्णयेन निवृत्तसंशया भवन्ति । अत्र वेदान्तशब्देन चैतन्ययोगिनस्तदधिष्ठातृपुरुषा उच्यन्ते । तेषामेव तत्त्वचिन्ताया देवतान्तरासंभवन्मुरभिद्वक्षोनिष्ठलक्ष्मीचरणलाक्षाचिह्नदर्शनस्य ततस्तदङ्कितो मुरभिदेव परतत्त्वमिति निवृत्तसंशयत्वस्य चोपपत्तेः "अतश्चवेदान्तपुरुषा वेदेषु" "न किरिन्द्रत्वदुत्तरः" "अग्निरग्रे प्रथमो देवतानाम्" "एक एव रुद्रो न द्वितीयाय तस्थे" "विश्वाधिको रुद्रो महर्षिः" "हिरण्यगर्भस्समवर्तताग्रे" इति नानादेवतापारम्यप्रतिपादनात्, "एको ह वै नारायण आसीत्" अग्निरवमो देवतानां विष्णुः परमः" इति तत्साधारण्येन विष्णुपारम्यस्यापि प्रतिपादनादुक्तेष्वेतेषु कः परतत्त्वमिति संशये सति स्वयं निर्णेतुमसमर्थाः श्रीरङ्गधामनि मुरभिदं श्रीरंगराजमासेव्य तदुरस्यसाधारणश्रीपदलाक्षालाञ्छनदर्शनेन अयमेव परतत्त्वमिति निश्चिन्वत इति भगवतः श्रीपराशरभट्टार्यस्य तात्पर्यम् । यद्वा वेदान्ता उपनिषदस्तत्त्वचिन्ताम् "न

किरिन्द्र त्वदुत्तरः" इत्याद्युक्तरीत्या स्वैर्नानादेवपारम्यप्रतिपादनादेषु कः परतत्त्व-मिति परतत्त्वविषये श्रोतृसंशयजननिमित्तां चिन्तां खेद मुरभिदुरसि भगवद्व-क्षसि यत्पादचिह्नैरित्यनेन लक्ष्मीसंबन्धो लक्ष्यते । तरन्ति अतिवर्त्तन्ते । प्राशस्त्य-प्रतिपादनसाधारण्येऽपि कारणवाक्येषु । "एको ह वै नारायण आसीत् न ब्रह्मा नेशानः" इतीतरनिषेधपूर्वकं भगवतः प्रलयसमयावस्थितिं प्रतिपाद्य "अथ पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयेति" इत्यादिना तस्य पुरुषशब्दवा-च्यतां जगत्सृष्ट्यादिकर्तृताञ्च प्रतिपाद्य "सहस्रशीर्षापुरुषः" इत्यारभ्य "तस्य धीराः परिजानन्ति योनिम्" इत्यन्तेन वाक्यजातेन नारायणपुरुषशब्दवाच्यस्य सहस्रशिरःपादादिमत्त्व-विश्वशरीरत्व-मोक्षप्रदत्व-महामहिमत्व-सर्वतोज्यायस्त्व-स-र्वभूतैकपादत्व-त्रिपाद्विभूतिमत्त्व-विश्वाक्रमणकर्तृत्वचराचरोत्पादकनानावयवत्त्वतमः पारवर्त्तित्व-सर्वनामरूपव्याकर्तृत्व-कर्मकृतजन्मरहितत्व-स्वेच्छाकृतानेकावतारत्व-तदवतारहेत्वपारकारुणिकत्वानि प्रतिपाद्य एवंविभवो नारायणशब्दवाच्यश्च क इत्यपेक्षायाम् "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" श्रियं लोके देवजुष्टामुदाराम्" इति तस्य लक्ष्मीपतित्वप्रतिपादनाल्लक्ष्मीपतिरेव नारायणपुरुषशब्दवाच्यः पूर्वोक्तसर्ववैभ-वयुक्तः परतत्त्वञ्चेति श्रोतारो निश्चिनुयुस्ततो नास्माभिश्चिन्ता कार्येति खेदं मुञ्चन्ती-त्यर्थः। तरन्तीत्यनेन मातापितृसहस्रेभ्यो वत्सलतरतया वेदान्तानां तत्खेदस्य दुस्तरत्वं सूचितम्। अनेन लक्ष्म्याः वेदान्तवेद्यत्वं सूचितम् । भोगोपोद्घातकेलीचुलुकित-भगवद्वैश्वरूप्यानुभावा भोगस्य श्रीविषयस्य भगवत्कृतस्यालिङ्गनचुम्बनालोकनश्लाघ-नादिरूपोद्घात उपक्रमस्तस्मिन्केल्या लीलया चुलुकितः प्रसृतिपीतोऽल्पीकृतः वा भगवद्वैश्वरूप्यस्य विश्वशरीरत्वस्य अनन्तभुजवक्त्रनेत्रशीर्षत्वरूपस्य अनुभावो माहात्म्यं यस्यास्सा तथोक्ता स्वालिङ्गनचुम्बनाद्युपक्रमकेल्यपर्याप्तभगवद्विश्वविग्र-हविभवेत्यर्थः । तदुक्तं यामुनार्यैः " स्ववैश्वरूप्येण सदानुभूतयाप्यपूर्ववद्वि-स्मयमादधानया' इति । वक्ष्यति चायं दशशतपाणिपादेत्यादिना । यद्वा भोगस्य श्रीकृतस्वभगवत्स्वरूपरूपगुणविभूत्यनुभवस्य उपोद्घातकेलीत्यादेः पूर्वव-दर्थः । पूर्वयोजनायां स्वानुभवसाधनत्वापर्याप्तभगवद्विश्वविग्रहविभवत्वम् । द्वितीय-योजनायां स्वानुभवविषयापर्याप्तभगवद्विश्वविग्रहविभवत्वं चार्थ इति भेदः । पूर्वयोजनायां लक्ष्म्यास्सौन्दर्यातिशयस्सूचितः । द्वितीययोजनायां तज्ज्ञानशक्ति-

चातुर्यादिवैलक्षण्यं सूचितम् । सा पूर्वोक्तगुणविशिष्टा भगवत्स्वरूपनिरूपकत्वेन प्रसिद्धा वा । पादत्रयेणापि परत्वमुक्तम । अथ सौलभ्यमाह–श्रीरिति । स्वेतरैः श्रीयत इति श्रीः । अमृतलहरिधीलंघनीयैः अमृतलहरीधिया अमी अमृततरङ्गा इति बुद्ध्या लंघनीयैः प्राप्यैः । लघेर्गत्यर्थत्वात्स्वेष्वमृततरङ्गबुद्धिजनकैरित्यर्थः । यद्वा अमृतलहरिधीः अमृततरंगबुद्धिस्तदपेक्षया लङ्घनीया त्याज्या यैस्तैः प्रयोजकैस्सर्वेषामितिशेषः । अमृततरङ्गेभ्योऽप्यतिमधुरतया सर्वेषाममृततरंगाशा॰ निवर्त्तकैरित्यर्थः । अपाङ्गः कटाक्षैः । नः अस्मान् । आस्तृणीताम् आच्छादयतु अभिषिञ्चत्वित्यर्थः । आङ्पूर्वात् " स्तृञ् आच्छादने" इत्यस्माद्धातोः स्नाप्रत्यये " ई हल्यघोः " इतीत्वलोडात्मनेपदप्रथमपुरुषैकवचनम् ॥ ४ ॥

मुरारि श्रीरंगराजके स्थावर जंगम नीच ऊंच भावकी सृष्टिमें लक्ष्मीजीकी भ्रूविक्षेपही प्रमाण है अर्थात् स्थावर सृष्टिमें नीच ऊंच भाव यह है कि जैसे कल्पवृक्ष, चंदन, आम्र, पीपल, नारियल आदिकी अपेक्षा करके अपनेसे नीचे नीचे सेहुंड बबूर आकसे लेकर परस्परमें नीच भावकी सृष्टिमें हैं और अपनेसे ऊपर २ कल्पवृक्ष पर्यंत ऊंचभावमें हैं और चर सृष्टिमें नीच ऊंच भाव यह है कि, जैसे देवोंकी अपेक्षासे मनुष्य, मनुष्योंमें ब्राह्मण, ब्राह्मणकी अपेक्षासे क्षत्रियादिक चाण्डालपर्यंत नीच भावमें हैं तिर्यक् योनिमें भी हंस, गरुड, शुक, सारिका, मयूर, कोकिलादिकोंकी अपेक्षासे कंक, गृध्र, काक, उलूकादिकोंका नीच भाव है और इनसे एक एक ऊपर कहेहुओंकी ऊंच भाव है इस प्रकारकी सृष्टितारतम्यमें लक्ष्मीजीका ही भ्रूभंग नियामक है अर्थात् जिसके ऊपर लक्ष्मीजीका जिस प्रकारका कटाक्ष पडा वह उसी प्रकारका तारतम्यवाला होता भया इससे यह सिद्ध भया कि श्रीजीके भ्रूभंगकाही तारतम्य देखकर हरि स्थावर जंगमात्मक जगत् तरतमभावसे सृष्टि करते हैं । कदाचित् कहो कि श्रीजीके भ्रूभंग तारतम्यके कारण जगत्में विषमता होनेसे लक्ष्मीजीमें वैषम्य नैर्घृण्य (विषम और निर्दयत्व) दोषापत्ति होगी तहां कहते हैं कि, जैसे धाताको जगत् सृष्टिमें वेद प्रमाण है अर्थात् वेदके शब्दोंको ही देखकर देवमनुष्यादि सृष्टि करते हैं तैसेही भगवान्को चराचर रचनाके तारतम्यमें श्रीजीका भ्रूभंग प्रमाण है यह भाव है । और उपानिषदोंके अधिष्ठातृ पुरुषोंको ब्रह्मा शिव विष्णु इनमें परतत्त्व कौन हैं जब ऐसा संदेह भया तब मुरदैत्यको मारनेवाले श्रीरंगनाथके वक्षःस्थलमें लक्ष्मीजीके चरणसंलग्न लाक्षारसके चिन्होंको देखकर श्रीरंगनाथही परतत्त्व हैं इस प्रकार श्रीजीकेही

विष्णुपत्नीत्व लक्ष्मीपत्नीत्वरूप संबंधविशेषसे वेदांतपुरुष परतत्त्व विषयक संशयको तर जाते हैं इससे लक्ष्मीको वेदांतवेद्यत्व सिद्ध भया। और भोग अर्थात् श्रीजीके विषय भगवत्कृत आलिंगन चुंबन अवलोकन श्लाघन विलासादि लीलाही करके चुलुकित (परस्पर) करलिया है भगवान्का विश्वरूप भाव अर्थात् विश्वशरीरत्व अनंतभुजवक्त्रनेत्रशीर्षत्वादि माहात्म्यको जिन्होंने, यद्वा भगवान्के विषय लक्ष्मीजी कृत स्वरूप, रूप, गुण, विभूतिका अनुभव चुलुकित होजाता जिनको ऐसी श्री (अपनेसे इतर सब जगत्के सेव्य) अमृतलहरि बुद्धिको उलंघन करके निरतिशय माधुर्यको देनेवाले कटाक्षोंसे हम लोगोंको आच्छादन करो॥ ४॥

श्लोकद्वयप्रार्थितप्रकारेण लक्ष्मीकटाक्षामृतवीचिविशदीकृतविज्ञानविषयीकृततत्स्वरूपरूपगुणविभूतिर्ब्रह्माद्यशक्यस्तवं तद्वैभववैपुल्यं स्ववाक्फल्गुतां चानुसन्धाय तत्स्तुतिसाहसप्रवृत्तस्य स्वस्य वाक्प्रशस्त्यै स्वस्तीति साभिप्रायमाह—

पूर्व दो श्लोकोंके कथन प्रकारसे लक्ष्मीजीकी कटाक्ष रूप अमृततरंगकी छींटा पडनेसे विशद विज्ञानके विषय करलिये हैं स्वरूप रूप गुण विभूति जिन्होंने ऐसे अपना अंशभूत जो ब्रह्मादिक तिनके निरतिशय ज्ञानवैभवको देखकर तथा सर्वथा अपनी निहीनता और वाक् तुच्छताको स्मरणकर साक्षात् श्रीदेवीके स्तुतिसाहसमें लगी अपनी वाक्के विस्तारके लिये इस श्लोकमें मंगलप्रार्थना करते हैं—

> यद्यावत्तव वैभवं तदुचितस्तोत्राय दूरे स्पृहा
> स्तोतुं के वयमित्यदश्च जगृहुः प्राञ्चो विरिञ्च्यादयः।
> अप्येवं तव देवि वाङ्मनसयोर्भाषानभिज्ञं पदं
> कावाचः प्रयतामहे कवयितुं स्वस्ति प्रशस्त्यै गिराम्॥ ५॥

यद्यावत्तवेति—हे देवि श्रीरङ्गेश्वरि! तव वैभवं 'यत् यत्स्वरूपम् यावत् यावत्परिमाणम् तदुचितस्तोत्राय तदुभयानुरूपस्तवनाय "क्रियार्थोपपद०" इत्यादिना चतुर्थी। स्पृहा इच्छा दूरे दूरत एव न संभवेतीत्यर्थः। इच्छा जाताऽपि विफलैव निरवधिकविभवस्तुतेरशक्यत्वादित्यर्थः। इच्छादूरे इत्यत्र सम्बन्ध्यनिर्देशात् सर्वेषामिति गम्यते। ननु मद्विभवस्य स्तोतुमशक्यत्वे विरिञ्च्यादयः कथं तुष्टुवुरित्यत्राह-स्तोतुं क इति। प्राञ्चः प्राचीनाः नाद्यतनाः तेन ज्ञानशक्तिवैपुल्यं सूचि-

तम् । विरिञ्चिर्ब्रह्मा " ब्रह्मा ब्रह्मविदांवरः " इतिप्रसिद्धविभवश्चतुर्मुखआदिर्येषांते तथोक्ताः आदिशब्देन शिवशतमखादयो गृह्यन्ते अदश्चेत्यत्र चशब्दो भिन्नक्रमः विरिञ्च्यादयश्चेत्यर्थः । ते च वयं मितप्रज्ञा इत्यर्थः । अद इदं वैभवम् अदःशब्देन " यतो वाचः " इति श्रुत्युक्तवाङ्मनसागोचरत्वं सूच्यते ॥ स्तोतुं के कियच्छक्तिका इति । इदं वचनं जगृहुः अवदन्न तुष्टुवुरित्यर्थः । यद्वा वयं स्तोतुं क इति वचनम् । अदश्च इदं वैभवं च जगृहुः । स्तोतुमशक्यमिति वदन्त एव तूष्णीं भवितुमशक्ता वैभवं यथाशक्ति तुष्टुवुरित्यर्थः । तेन स्तुतावसाकल्यं सूचितम् । अप्येवं एवमपि ब्रह्माद्यशक्यस्तवत्वेऽपि वाङ्मनसयोर्वाक्यचित्तयोरुपनिषदामपीति शेषः । वाङ्मनसशब्दोऽकारान्तः " अचतुरविचतुर० " इतिसूत्रेण निपातितः । भाषा भाषणम् । वाक्चित्ताभ्यां परिच्छेदः तदनभिज्ञं वाङ्मनसामगोचरमित्यर्थः । यद्वा वाङ्मनसयोर्भाषा वाङ्मनसवाचकशब्दस्तदनभिज्ञम् तद्वाचकशब्दमेव न जानाति कुतस्ते जानीयात् तद्गोचरत्वं दूरापास्तमिति भावः । तव पदं पद्यत इति पदं स्वस्वरूपम् । कवयितुं वर्णयितुम् । कावाचः कुत्सितवाचः । " ईषदर्थे च " इतिकुशब्दस्य कादेशः । अनेन स्तुतिसामग्रीवैकल्यं सूचितम् । प्रयतामहे प्रकृष्टयत्नं कुर्महे अहो साहसिकत्वमस्माकमिति भावः । गिरां स्तुतिवचसाम् प्रशस्त्यै प्रसिद्ध्यै । स्वस्ति मङ्गलं स्यादितिशेषः । स्यादिति काकुः न स्यादित्यर्थः । अतिसाहसिकप्रयत्नोऽयं न फलतीति हृदयम् । स्तुतिप्रयत्नस्य साहसकृत्यत्वेऽपि शेषत्वस्वरूपोचितकिंचित्काररूपत्वाद्वाक्प्रसिद्ध्यै स्वस्ति भवत्विति प्रार्थनायां वा तात्पर्यम् ॥ ९ ॥

हे देवि ! आपका वैभव जैसा स्वरूपवाला, जितना विस्तारवाला है तिसके उचित स्तुति करनेके लिये हमारी (मित ज्ञानवालेकी) क्या सामर्थ्य है इस प्रकार स्तुति करते ब्रह्मा, शिव इंद्रादिक पुराने महापुरुषोंने भी कहाहै, ऐसे आपके निरातिशय वैभवकी स्तुति करनेमें अपनी असमर्थताको कहते भी वे लोग चुपकेसे नहीं बैठे यथाशक्ति कहे ही । ऐसा है तौ भी जो वचन मनके अगोचर आपका पद है अथवा वाक् मनका वाचक जो शब्द तिन शब्दोंसे अग्राह्य आपका स्वरूप है उस स्वरूपका वर्णन करनेके लिये कुत्सित (खराब) वचनवाला मैं प्रयत्न करता हूं अहो इस हमारे साहसको धन्यवाद है भला

इस अतिसाहसमें प्रवृत्त स्तुतिविडम्बन करनेवाली वाक्‌की प्रसिद्धिका मंगल होगा ? नहीं होगा । अथवा इस स्तुतिप्रयत्नके लिये प्रवृत्त हमारी वाणीको साहसत्व है तौभी शेषीका कैंकर्यरूपसे किंचित्कार करना शेषका स्वरूप होनेसे वाक् विस्तारके लिये मंगल होय ऐसा प्रार्थना करते हैं ॥ ५ ॥

ब्रह्माद्यशक्यस्तवत्वेऽपि श्रियस्तद्गुणविस्तारणेन स्तोतृत्वं स्वस्मिन्नेव पर्यवस्यतीत्याह—

यद्यपि ब्रह्मादिकोंको आपकी स्तुति (गुणादिकोंका कथन) अशक्य भी है तथापि गुणोंका विस्तारद्वारा स्तोत्रकरना हमारेमें घटता है सो कहते हैं—

स्तोतारं तमुशन्ति देवि ! कवयो यो विस्तृणीते गुणान्
स्तोतव्यस्य ततश्च ते स्तुतिधुरा मय्येव विश्राम्यति ।
यस्मादस्मदमर्षणीयफणितिस्वीकारतस्ते गुणाः
क्षान्त्यौदार्यदयादयो भगवति स्वां प्रस्नुवीरन्प्रथाम्[1] ॥ ६ ॥

स्तोतारमिति । हे देवि ! स्तोतव्यस्य स्तुत्यस्य गुणान् यो विस्तृणीते विस्तारयति विपूर्वात् " स्तृञ् आच्छादने " इति धातोः श्नाप्रत्यये " ई हल्यघोः" इतीत्वे त इत्यस्य एत्वे कृते विस्तृणीत इति रूपम् । तं कवयः पण्डिताः " संख्यावान् पण्डितः कविः " इत्यमरः । स्तोतारं स्तावकम् उशन्ति कथयन्ते "वश कान्तौ" इत्यस्माद्धातोः " ग्रहिज्या० " इति संप्रसारणे " झोऽन्तः " इत्यन्तादेशे उशन्तीति रूपम् । ततः गुणविस्तारकस्यैव स्तोतृत्वकथनात् । चेति चकारेण पूर्वश्लोकसूचितस्वरूपोचित कैङ्कर्यरूपस्तुतिप्रवृत्तिर्हेतुत्वेन समुच्चीयते । ते स्तुतिधुरा त्वद्विषयस्तोत्रभारः । धुराशब्द आकारान्तः हलन्तानामजन्तत्वं भागुरिर्मन्यते । मय्येव न विरिञ्च्यादिषु तेषां श्रुतिमधुरवाक्त्वादिति भावः । विश्राम्यति पर्यवस्यति स्तोतृत्वं च ममैवोचितमित्यर्थः । कथं त्वया मद्गुणा विस्तीर्यन्ते येन तवैव स्तोत्रता स्यादित्यत आह-यस्मादिति । यस्मात् यतो हेतोः अस्मदमर्षणीयफणितिस्वीकारतो मत्कठोरवचनविषयीभावतः ते तव क्षान्त्यौदार्यदयादयः वाग्दोषसहनेन क्षान्तिः अयोग्येनापि मया स्वस्तुतिनिर्वर्तनादौदार्यम् । स्तुत्यकरणे दुःखितस्य मे फणितिस्वीकारेणानुकम्पना दया । आदिशब्देन फणितिदोषे गुणत्वबुद्धेर्वात्सल्य चेति गुणाः स्वां स्वकीयाम् । प्रथां

[1] प्रस्तुवीरन् इति च पाठः ।

सिद्धिं प्रकाशं वा प्रस्नुवीरन् जनयेयुः । "ष्णुप्रस्रवणे" इत्यस्माद्धातोर्लिङा-त्मनेपदबहुवचने लिङःसीयुटः सलोपे उवङि झस्यरनादेशेप्रस्नुवीरन्निति रूपम्६॥

हे देवि ! कविलोग स्तोतानाम उसीका कहते हैं जो स्तोतव्य (जिसकी स्तुति कीजाय) के गुणोंका अलंकार द्वारा विस्तार करे इससे आपकी स्तुतिका भार हमारेही विषय है । कैसे है ? सो कहते हैं कि, हे भगवति ! हमारे दुःसह (जो सुननेमें बुरा लगे (कठोर वचनोंके अंगीकारसे तुम्हारी क्षांति औदार्य दया वात्सल्यादि गुण अपने आपही ख्यातिको प्राप्त होंगे । अर्थात् हमारे कठोर अशुद्ध वचनोंको सुनकर सहनेसे आपकी क्षांति गुणकी ख्याती होगी और स्तुतिके अयोग्य हमको स्तुति करते देखकर औदार्य गुणकी, तथा स्तुति करनेकी सामर्थ्य न होनेसे हमको दुःखी देखकर दयागुणकी, आदि शब्दसे हमारे वाक्य दोषमें आपकी गुणबुद्धि होनेसे वात्सल्य गुणकी ख्याती होगी इससे मैं आपकी स्तुति करूंगा ॥ ६ ॥

एवं स्वस्य स्तोत्राधिकारं प्रसाध्य लक्ष्म्यनुग्रहेण स्वसूक्तिसमग्रतां प्रार्थयते—

ऐसे पूर्व श्लोकोक्त प्रकारसे लक्ष्मीजीके स्तोत्रमें अपना अधिकार सिद्ध करके श्रीजीके अनुग्रहसेही स्तोत्ररूपा अपनी शोभन उक्तिकी समाप्तिके लिये इस श्लोकमें प्रार्थना करते हैं—

सूक्तिं समग्रयतु नः स्वयमेव लक्ष्मीः
श्रीरङ्गराजमहिषी मधुरैः कटाक्षैः ।
वैदग्ध्यवर्णगुणगुम्फनगौरवैर्यां
कण्डूलकर्णकुहराः कवयो धयन्ति ॥ ७ ॥

सूक्तिमिति—श्रीरङ्गराजमहिषी श्रीरङ्गेश्वरवल्लभा । लक्ष्मीः श्रीः । श्रीरङ्गराज-महिषी लक्ष्मीरिति विशेषणविशेष्याभ्यां पतिवाल्लभ्यकृतं स्वविभवसामर्थ्यं सूचि-तम् । मधुरैः स्वादुभिः प्रियैश्च "स्वादुप्रियौ तु मधुरौ" इत्यमरः । कटाक्षैरपाङ्गैः न स्वव्यापनैः नोऽस्माकम् । सूक्तिं शोभनां वाचम् । स्वस्तुतिं स्वयमेव अस्मत्प्रयत्न-मनपेक्ष्यैव अस्मत्प्रयत्नापेक्षणे शोभनत्वं न सिध्येदिति भावः । समग्रयतु समग्रां करोतु संपूर्णां निर्वर्तयत्वित्यर्थः । उत्तरार्धेनोक्तशोभनतामेव विशदयति—वैदग्ध्येति । यामुक्तिं वैदग्ध्यवर्णगुणगुम्फनगौरवैः वैदग्ध्येन चातुर्येण वर्णानामक्षराणां गुणानां ओजःप्रसादशय्यापाकादीनां गुम्फनगौरवैः प्रथनातिशयैः । यद्वा वैदग्ध्यम्

अर्थकल्पना वर्णगुणाः वर्णधर्माः प्रसादमाधुर्यादयः तेषां गुम्फनं रचना तद्गौरवैः तदतिशयैर्निमित्तैः । कवयः पण्डिताः । कण्डूलकर्णकुहराः कण्डूरेषामस्तीति कण्डूलानि मत्वर्थे लच् तथाभूतानि कर्णकुहराणि श्रोतृविवराणि येषां ते तथोक्ताः श्रवणसकुतूहलश्रुतिविवराः सन्तः सदा दत्तकर्णा इत्यर्थः । धयन्ति पिबन्ति "धेट् पाने" इत्यस्माद्धातोस्तिङि शप्प्रत्यये अयादेशे "झोऽन्तः" इत्यन्तादेशे धयन्तीतिरूपम् । धयन्तीति पानोक्त्या सूक्त्याः सुधासाम्यं सूचितम् ॥ ७ ॥

श्रीरंगराजमहिषी श्रीरंगनाथकी प्रिया लक्ष्मी अपनी प्रियकटाक्षों (सौम्य दृष्टियों) से ही इस स्तुतिरूप सुंदर वचनोंको हमारी ढिठाई और प्रयत्नको नहीं देखकर आपही समाप्ति करो अर्थात् हमारा प्रयत्न देखनेसे इसके पदपदार्थोंमें शोभनता नहीं संभव होसकती यह तात्पर्य है । इस श्लोकमें लक्ष्मी और श्रीरंग राजमहिषी इस विशेष्य-विशेषणसे यह फलित भया कि श्रीरंगराजके वल्लभात्वसंबंधसे लक्ष्मीजीका निरतिशय वैभव है स्वातंत्र्यसे नहीं, यह सूचित भया. अब आगे आधे श्लोकमें उक्त शोभनताका विस्तार करते हैं कि, अर्थ कल्पना और अक्षरोंका परस्परमें संमेलनादि गौरवातिशयों करके उत्तम काव्य सुननेके लिये कर्णविवरमें खाज चलता है जिन्होंके ऐसे कविलोग दत्तचित्त होकर जिस सूक्तिको अमृतपानके समान पान करते हैं ऐसी हमारी उक्तिको लक्ष्मीजी केवल अपनी कृपादृष्टिसे ही सुधारो यह प्रार्थना है ॥ ७ ॥

संग्रहेणोक्तं विवक्षितोक्तिगौरवं विवृण्वन् स्वस्मै श्रीरेव तद्विस्तारयत्विति प्रार्थयते—

संग्रहसे कहे भये पदपदार्थोंमें निर्दोषता सुंदरता संमेलनादि गुणोंसे परिपूर्णकर इस उक्तिको श्रीजी आपही विस्तार करो ऐसा इस श्लोकमें प्रार्थना करते हैं—

अनाघ्रातावद्यं बहु गुणपरीणाहि मनसो
दुहानं सौहार्दं परिचितमिवाथापि गहनम् ।
पदानां सौभ्रात्रादनिमिषनिषेव्यं श्रवणयो-
स्त्वमेव श्रीर्मह्यं बहुमुखय वाणीविलसितम् ॥ ८ ॥

अनाघ्रातेति—हे श्रीः ! अनाघ्रातावद्यम् अनाघ्रातमस्पृष्टमवद्यं वर्णपद-

वाक्यगतः श्रुतिकट्वश्लीलप्रक्रमभङ्गादिदोषो यस्य तं तथोक्तम् । बहूनां गुणानां पाकवृत्तिशब्दार्थालङ्कारादीनां परीणाहि विशालतास्यास्तीति तथोक्तम् । मनसः सौहार्दं सन्तोषम् । दुहानं दोग्धृ संपूर्णरसमित्यर्थः । अनेन विशेषणत्रयेण काव्य-सामान्यलक्षणमुक्तम् । निर्दोषसगुणसरसशब्दार्थयोरेव काव्यत्वात् । परिचितमिव ज्ञातार्थमिव स्थितम् । श्रोतॄणामिति शेषः । अथापि गहनम् अज्ञातार्थबहुलं ध्वनिप्रधानमित्यर्थः । अनेनोत्तमकाव्यत्वं सूचितम् । " ध्वनिप्रधानता यत्र तदु-त्तममुदाहृतम् " इति लक्षणात् । पदानां सुप्तिङन्तादीनाम् सौभ्रात्रात् स्नेहात् शय्याया इत्यर्थः । ' या पदानाम्परान्योन्यमैत्री शय्येति कथ्यते ' इति लक्षणात् । श्रवणयोः श्रोत्रयोः । अनिमिषं निर्निमेषं सावधानं साश्चर्यं वा निषेव्यं सेवितुमर्हम्, ग्राह्यमित्यर्थः । वाण्याः सरस्वत्याः "गीर्वाग्वाणी सरस्वती" इत्यमरः । विलसितं भाषारूपं विलासं कर्म भावे क्तः । त्वमेव मह्यं बहुमुखय बहुमुखीकुरु । न त्वहं वाणीं प्रसादयामि । अनन्यदैवत्वस्वरूपविरुद्धत्वात् । त्वत्प्रसादलक्षणराजकुलमाहात्म्यलब्धस्यैव तद्विलसितस्य स्वरसत्वाच्चेति भावः॥८॥

हे श्रीः ! जिसमें दोषका गंध न हो अर्थात् वर्ण पद वाक्यमें प्राप्त सुननेमें कटु अश्लील (घृणित) प्रक्रमभंगादि दोष रहित हों और बहुत गुणोंका विस्तार जिसमें हो अर्थात् पाक वृत्ति शब्द अलंकारादिकों करके विस्तृत हो तथा मनको संतोषरस दायक हो, इन तीन विशेषणों करके काव्यका सामान्य लक्षण कहे, क्योंकि शब्द अर्थ दोनोंमें निर्दोषत्व सगुणत्व सरसत्व होनेको ही काव्य कहते हैं । और सुननेवालोंको परिचित अर्थकी नाई ज्ञात हो परंतु प्रायशः शब्द अर्थ दोनों दुर्ज्ञेय हों इससे काव्यका उत्तमता सूचित किया; क्योंकि जिस काव्यमें ध्वनि प्रधान हो उसको कविलोग उत्तम काव्य कहते हैं और पदोंका उत्तरोत्तर संमेल संबन्धादि इन सब गुणोंसे परिपूर्ण हो जिसके सुनते आश्चर्यसे कवियोंके नेत्रोंके पलके न पडें अर्थात् निर्निमेष सावधान साश्चर्य होकर सुननेके योग्य वाणीका भाषारूप विलास जिसमें हो ऐसा काव्य हे लक्ष्मि ! तुम आपही हमारे लिये प्रकाश करो अर्थात् देवो ॥ ८ ॥

स्वप्रार्थनानुगुण्येन लक्ष्मीकटाक्षलब्धवाग्विलासपूर्वं श्रीरङ्गराजस्तवे त्रिंशदु-त्तराभ्यां पूर्वोत्तरशतकाभ्यां श्रीरङ्गराजमुच्चैरभिष्टूय एकषष्टिश्लोकपरिमितत्वेन ततः शब्दसंकोचेप्यर्थपौष्कल्येन, रसपौष्कल्येन संदर्भविशेषविशिष्टतया च ततो-

अतिशयितां श्रीस्तुतिं चिकीर्षुः स्वापेक्षया श्रियोऽधिकतया स्तवने श्रीरङ्गराजः कुपितः स्यादिति तत्कोपशान्तये तं श्रियः श्रीःश्रीरङ्गेशयेतिविशेषणविशेष्याभ्यां प्रसाद्य स्ववाल्लभ्येन चिकीर्षितं सप्रागल्भ्यं प्रतिजानीते—

इस श्लोकमें पूर्वोक्त प्रार्थनाके अनुगुण लक्ष्मीजीकी कृपा कटाक्षसे वाग्विलासको प्राप्त होकर श्रीरंगनाथसे श्रीजीकी अधिक स्तुति करनेकी इच्छाकरके, अपनेसे अधिक श्रीजीकी स्तुति सुनकर कदाचित् श्रीरंगराज कुपित न हों इस भयसे कोपशांतिके लिये ' श्रियः श्रीः श्रीरंगेशय ' इस पदसे श्रीरंगनाथको प्रसन्न करते हैं—

श्रियः श्रीः श्रीरङ्गेशय तव च हृद्यां भगवतीं
श्रियं त्वत्तोऽप्युच्चैर्वयमिह (भ) फणामः शृणुतराम् ।
दृशौ ते भूयास्तां सुखतरलतारे श्रवणतः
पुनर्हर्षोत्कर्षात् स्फुटतु भुजयोः कञ्चुकशतम् ॥ ९ ॥

श्रियः श्रीरिति । श्रियः सर्वसमाश्रयणीयायाः श्रीः आश्रयणीयः श्रिय इति सर्वेषां श्रीसमाश्रयणेन स्वरूपलाभः । श्रीरिति श्रियो भगवत्समाश्रयणेन स्वरूपलाभश्च सूचितः । तथा श्रिय इति श्रियः स्वव्यतिरिक्तैकोनसर्वशेषित्वम् । श्रीरितिभगवतः स्वव्यतिरिक्तसर्वशेषित्वं सूचितम् । श्रीरङ्गे दिव्यनगरे श्रीरङ्गाख्ये दिव्यविमाने वा शेत इति श्रीरङ्गेशय सर्वसमाश्रयणोचितसौलभ्यसीमाभूमे ! एवं विशेषणविशेष्यपदाभ्यां श्रीरङ्गेशः प्रसादितः । तत्र च हृद्यामिति साभिप्रायं वचनं स्वेतरसर्वजनहृद्यस्त्वमुच्चैः फणितः । तत्र च हृद्यायास्त्वत्तोऽप्युच्चैः फणनमुचितमिति त्वया न कोपः कार्य इति । हृद्यां हृदयङ्गमां भोग्यां वक्षःस्थलनिवासिनीं वा भगवतीं षाड्गुण्यपरिपूर्णाम् श्रीकाममाहात्म्यादियुक्तां वा अत एव श्रियं पुरुषकारत्वेनास्मदाद्याश्रयणीयाम् । त्वत्तोऽप्युच्चैर्भवतोऽप्यतिशयेन त्वदपेक्षया श्रियमतिशयितत्वेन त्वं श्रीस्तुतिं करोषि चेद्यथाकुर्यास्ततोऽप्यतिशयेनेतिवार्थः । मत्तोऽप्युच्चैः के फणिष्यन्तीत्यत आह-वयमिति । वयं युष्मत्प्रसादैकलब्धविशदतमज्ञानाः । अनेन स्वप्रयत्नपूर्वका विशदज्ञानब्रह्मादिव्यावृत्तिः । वयमिति बहुवचनेन स्वसमानज्ञानश्रीवत्साङ्कमिश्रयतिवरयामुनाचार्या गृह्यन्ते । इह त्वत्समक्षमेव फणामः स्तुमः न तु परोक्षे यत्किञ्चित्प्रगल्भवचनं ब्रूमः अत्र स्तुतिर्नाम नाविद्यमानगुणारोपो

विद्यमानयावद्गुणपरिच्छेदो वा किंतु यथावज्ज्ञातगुणवर्णनं तत्तथैव क्रियते शृणुतराम् सम्यक्छ्रवणं कुर्याः त्वमेव साक्षीभवेति भावः। न केवलं श्रीस्तुतिश्रवणेन ते कोपाभावः प्रत्युत श्रवणसुखेन चक्षुषोर्वैवश्यं संतोषातिशयादपरिमितकञ्चुकस्फुटनहेतुर्गात्रपरिपोषश्च भवेदित्याह—दृशौ त इत्यादिना। श्रयणतः स्तुतिश्रवणात् ते दृशौ सुखेन तरले चञ्चले तारके कनीनिके ययोस्ते तथोक्ते भूयास्ताम् पुनः किंचेत्यर्थः। हर्षोत्कर्षात् आनन्दातिशयात्। भुजयोः अधिकरणे सप्तमी कञ्चुकशतं स्फुटतु प्रथममेककञ्चुकस्फोटे ततोऽपि पृथुत्वेनापरकञ्चुकधारणे गात्रजृम्भणेन तस्यापि स्फुटने ततोऽपि विपुलकञ्चुकधृतौ विग्रहविवृद्धया अस्यापि स्फोट इत्येव प्रकारेणापरिमितकञ्चुकस्फोटो भवत्वित्यर्थः। पुनरित्यस्य मुहुरिति वा अर्थः॥९॥

हे श्रियः श्रीः श्रीरंगेशय ! अर्थात् सबको आश्रयण करनेके योग्य श्री तिनके श्री (सेव्य) श्रीरंगेशय (श्रीरंगविमान वा श्रीरंगनगरमें सोनेवाले हे सौलभ्यसीमाभूमे !) सब जगत्को प्रिय आप हो शिष्टजनोंने आपकी सर्वोत्तम स्तुति किया है और आपकी परमप्रिया नित्यही वक्षस्थलमें निवास करनेवाली भगवती (ज्ञान शक्ति बल ऐश्वर्य वीर्य तेज इन छः गुणोंवाली) श्रीजी हैं तिनकी निरतिशय महिमाका वर्णन आपसेभी बढकर हम करेंगे। यहां मूलमें वयं कहनेका तात्पर्य यह है कि, अपने योगबलसे उत्पन्न ज्ञानके विना आपकी कृपासे प्राप्त ज्ञानवाले श्रीवत्सांकमिश्र, यतिवर श्रीयामुनाचार्य प्रभृति हमलोग आपसे बढकर श्रीजीके विद्यमान गुणोंका कथन आपके समक्षमें करते हैं। सो आप सुनो, जिसके सुननेसे आपके दोनों नेत्रोंके तारे (पुतली) आनंदसे चंचल होजायंगे वा दोनों नेत्र खिलजायंगे फिरभी हर्षके वृद्धिसे आपके भुजाओंके बीचमें सैकडों जामा फटजायंगे अर्थात् श्रीजीकी स्तुति सुननेके आनंदसे शरीर फूलनेसे प्रथम जामा फटनेके अनंतर दूसरा जामा, फिर तिसमेंभी गात्रवृद्धि होनेसे तीसरे जामाकी अपेक्षा होगी इसी प्रकार सौ जामा पर्यंत फटते जांयगे ॥ ९ ॥

प्रतिज्ञातक्रमेण श्रियं स्तोष्यन् मानाधीना मे सिद्धिरिति न्यायेन श्रीस्वरूपरूपगुणादिषु सपरिकरां श्रुतिं प्रमाणयन् अर्थतः श्रीगुणरत्नकोशाख्यां स्तुतेः सूचयति—

इस श्लोकमें अपनी पूर्व प्रतिज्ञाके अनुसार लक्ष्मीजीकी स्तुति करनेके लिये श्रीजीके स्वरूप रूप गुणादिकोंके विषयमें सांगोपांग श्रुतियोंको श्रीगुणरत्नकोशत्व सिद्ध करते हैं—

देवि श्रुतिं भगवतीं प्रथमे पुमांस-
स्त्वत्सद्गुणौघमणिकोशगृहं गृणान्ति ।
तद्द्वारपाटनपटूनि च सेतिहास-
संतर्कणस्मृतिपुराणपुरःसराणि ॥ १० ॥

देवीति । हे देवि ! प्रथमे पूर्वे "प्रथमचरम०" इत्यादिना विकल्पेन सर्वनामसंज्ञा । पुमांसः वसिष्ठवाल्मीकिपराशरपाराशर्यादिपरमर्षयः । श्रीपराङ्कुशपरकालयतिवरादयश्च भगवतीं स्व तःप्रमाणत्व-सकलपुरुषार्थप्रतिपादकत्वरूपमाहात्म्ययुक्ताम् श्रुतिं नित्यं श्रूयमाणां त्रयीम् अनेनापौरुषेयत्वनिर्दोषत्वानि सूचितानि । त्वत्सद्गुणौघास्त्वत्कल्याणगुणगणाः । ओघशब्देन गुणानामानन्त्यं सूचितम् । त एव मणिकोशा रत्नराशयः । "कोशोऽस्त्री संचयेऽपि च" इति रत्नमाला । गुणानामुज्ज्वलत्वमङ्गलावहत्वाभ्यां मणित्वरूपणं तेषां मणिकोशानां गृहं भाण्डागारं गृणन्ति व्यक्तं कथयन्ति । उपनिषदमित्यनुक्त्वा श्रुतिमिति सामान्यवचनेन पूर्वोत्तरभागात्मककृत्स्नवेदेऽपि श्रीवैभवप्रतिपादनं क्रियत इति भावः । तथैव "गृणाहि" "घृतवती" इत्यादिना पूर्वकाण्डे "सुमज्ज्ञानये विष्णवे श्रद्धया देवो देवत्वमश्नुते" "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" "हिरण्यवर्णां हरिणीम्" इत्यादिना परस्सहस्राणि वाक्यानि उत्तरकाण्डे च श्रीवैभवप्रतिपादकानि सन्ति । अत्र त्वत्सद्गुणेति श्रीगुणेत्यस्य मणिकोशेति रत्नकोशेत्यस्य च सूचनादर्थतः श्रीगुणरत्नकोशाख्यस्तोत्रनाम सूचितम् । इतिहासाः श्रीरामायणादयः । सम्यक्तर्कणं सन्तर्कणं समीचीन तर्क इत्यर्थः । "यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" इति स्मृतेः । संतर्कणं वेदार्थविचाररूपमीमांसा वा । इतिहाससन्तर्कणैस्सहितानि सेतिहाससन्तर्कणानि । स्मृतयो मन्वादिस्मृतयः । पुराणानि श्रीविष्णुपुराणप्रभृतीनि स्मृतयश्च पुराणानि च स्मृतिपुराणानि तान्येव पुरस्सराणि प्रमुखानि येषां तानि तथोक्तानि सेतिहाससंतर्कणानि च तानि स्मृतिपुराणपुरस्सराणि चेति कर्मधारयः । पुरस्सराणीति लक्ष्मीतन्त्रादीनि द्राविडदिव्यप्रबन्धरूपाणि प्रमाणानि च संगृह्यन्ते । पटूनि चेत्यत्र चकारो भिन्नक्रमः। पुरस्सराणि चेति चस्त्वर्थः। तानि तु तद्द्वारपाटनपटूनि

तस्य श्रुतिलक्षणत्वगुणमणिकोशगृहस्य द्वारपाटने कवाटविवृतौ त्वद्गुणवैभवतात्पर्यविवृतावित्यर्थः। पटूनि समर्थानि कुञ्चिकारूपाणि गृणन्तीत्यनुषङ्गः। तदुक्तम्—"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥" इति श्रुतिं त्वद्गुणौघमणिकोशगृहं स्मृतिपुराणपुरस्सराणि तद्द्वारपाटनपटूनि च गृणन्ति इति यथाश्रुतमेवान्वयः। इतिहासेषु श्रीरामायणस्य वेदोपबृंहणत्वं श्रीविभवप्रतिपादकत्वं च "वेदोपबृंहणार्थाय तावग्राहयत प्रभुः। काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्॥" इति तत्रैव प्रसिद्धम्। महाभारतादेस्तु भगवद्वैभवप्रतिपादने श्रियस्तदन्तर्भावात् तद्वैभवप्रतिपादकत्वं च सिद्धम्। श्रीविष्णुपुराणस्य श्रीवैभवप्रतिपादकत्वम् "नमामि सर्वलोकानां जननीम्" इत्यादिना स्पष्टमेव। एवमन्यत्रापि योजनीयम् ॥ १० ॥

हे देवि! वसिष्ठ वाल्मीकि पराशर व्यासादि महर्षियोंने तथा श्रीपरांकुश परकाल यतिवरादि ज्ञानवृद्धोंने स्वयं प्रमाणरूप और सकल पुरुषार्थोंको प्रतिपादन करनेवाली श्रुति (सदा सुननेके योग्य) वेदत्रयीको आपके कल्याण गुणगणरूप रत्नराशिकी भंडार कहाहै जैसे "गृणाहि, घृतावती" इत्यादि तथा "श्रद्धया देवो देवत्वमश्नुते, ह्रीश्च ते लक्ष्मीश्च पत्न्यौ, हिरण्यवर्णां हरिणीम्" इस प्रकार पूर्व उत्तरभागात्मक संपूर्ण वेदमें श्रीजीका वैभव प्रतिपादन किया है ऐसेही हजारहों वाक्य वेदके उत्तरकांडमें प्रसिद्ध हैं। तथा "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इस वचनसे वेदका व्याख्यानरूप इतिहास श्रीरामायणादि, संतर्कण समीचीन तर्क अथवा वेदके अर्थोंका विचाररूप मीमांसा, स्मृति मन्वादि, पुराण श्रीविष्णुपुराणादि तथा लक्ष्मीतंत्रादि, द्रविडोपनिषदादि आपके गुणरत्न भांडागाररूप वेदके दरवाजेका किवांड खोलनेमें समर्थ हैं जैसे—"वेदोपबृंहणार्थाय तावग्राहयत प्रभुः। काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्" इस प्रकार सीताजीके चरित्रमें वेदका व्याख्यानरूप समग्र रामायणका पर्यवसान होनेसे और महाभारतको भी भगवान्‌का वैभव प्रतिपादनमें श्रीजीके अंतर्भाव होनेसे और "नमामि सर्वलोकानां जननीम्' इस विष्णुपुराणके वचनसे लक्ष्मीजीके वैभवकी प्रसिद्धि है इसी प्रकार अन्यत्रभी योजना करना ॥ १०॥

इत्थं श्रीविभवे सपरिकरां श्रुतिं प्रमाणीकृत्य यावत्परमतं न निराक्रियते तावत्स्वमतमस्थिरमिति न्यायेन बाह्यकुदृष्टिमतानि निरसितुं तन्मतान्युपक्षिप्य

बाह्यप्रभृतयो न मया निरसनीयाः, किंतु मिथो विरोधात् परस्परमेव प्रतिहता बभूवु- यतस्तव कटाक्षलक्ष्यतां न गता इति श्रियं संबोध्याह–

इस प्रकार सांगोपांग श्रुतियोंको श्रीजीके वैभवमें प्रमाण सिद्ध करके, जबतक परमतका निरास न हो तबतक स्वमतकी स्थिरता नहीं होती इस न्यायसे बाह्य कुदृष्टिमतोंको उठाकर, परस्पर विरुद्ध विवादसे नष्टप्राय विवादियोंके विषय लक्ष्मीजीके कटाक्षका अभावही हेतु है, सो कहते हैं–

आहुर्वेदानमानं कतिचन कति चाराजकं विश्वमेत-
द्राजन्वत्केचिदीशं गुणिनमपि गुणस्तं दरिद्राणमन्ये ।
भिक्षावन्ये सुराजंभवमिति च जडास्ते तलातल्यकार्षु-
र्यं ते श्रीरङ्गहर्म्याङ्गणकनकलते न क्षणं लक्ष्यमासन्॥ ११॥

आहुरिति । हे श्रीरङ्गहर्म्याङ्गणकनकलते श्रीरंगे पुरे हर्म्यस्य दिविवि- मानस्य श्रीरङ्गाख्यस्य दिव्यविमानस्य वा अङ्गणमजिरं पुरःप्रदेशः "अङ्गणं चत्वराजिरे" इत्यमरः । तस्य कनकलते तत्रोद्भूतकनकलतेवस्थिते ! कनकेत्यनेनो- ज्ज्वल्यलावण्यसौन्दर्याणि सूचितानि, लतेत्यनेन सौगन्ध्यसौकुमार्ययौवनानि सूचितानि । ये पुरुषास्ते तव लक्ष्यं जायमानकटाक्षविषयाः । क्षणं क्षणमपि जन्मपरंपरासु कदापि नासन् नाभवन् " जायमानं हि पुरुषं यं पश्येन्मधुसूदनः। सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥ " इति वचनं लक्ष्मीजायमान- कटाक्षस्याप्युपलक्षणम्।तत्कटाक्षतदुपेक्षयोरिष्टानिष्टसाधनत्वं स्पष्टं श्रीविष्णुपुराणे "सः श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् । स शूरः स तु विक्रान्तो यं त्वं देवि ! निरीक्षसे । सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे !॥ " इति जडास्तत्त्वज्ञानहेतुत्वत्कटा- क्षविषयराहित्यादेव जडाः अज्ञानान्यथाज्ञानविपरीतज्ञानव्याकुलास्ते । कतिचन सुगतचार्वाकादयो वेदबाह्याः तेषामव्यपदेश्यत्वात् कतिचनेत्युक्तिः । एवं कति- चेत्यादिष्वपि बोध्यम् । वेदान् अपौरुषेयत्वनित्यत्वानिर्दोषत्वाखिलपुरुषार्थवेदक- त्वादिभिः प्रमाणतमान् अमानम् अप्रमाणम् आहुरिति साहसिकत्वं सूचितम् । कतिचन कापिलाः एतत्क्षेत्रज्ञा ज्ञातोपादानकविविधविचित्रभूधरसमुद्रादिरूपं ब्रह्मादिपिपीलिकान्तं च विश्वं जगत् अराजकं राजशून्यमनाथमाहुरित्यनुषङ्गः । ते

हि प्रकृतिपुरुषावेव जगत्कारणं प्रकृतिः पुरुषसंनिधानात्स्वव्यतिरिक्तत्रयोविंशतितत्त्वात्मना विकुरुते । प्रकृतिपुरुषाभ्यां सह पञ्चविंशतितत्त्वान्येव सन्ति तदतिरिक्त ईश्वरो नास्तीत्युपगच्छन्ति, उदाहरन्ति च " मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति । केचित् काणादाः राजन्वत् सुराजकम् आनुमानिकनिमित्तमात्रेश्वरम् " सुराज्ञि देशे राजन्वान्" इत्यमरः । विश्वमित्यनुषङ्गः । आहुरिति सर्वत्रान्वेति । अन्ये मृषावादिनः ईशं नियन्तारं गुणिनमपि "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "यस्सर्वज्ञस्सर्ववित्, अपहतपाप्मा सत्यकामस्सत्यसङ्कल्पः, तस्मिन्यदन्तस्तदन्वेष्टव्यम्, तस्मिन्कामास्समाहिताः " "काम्यन्त इतिकामाः कल्याणगुणाः" इति भाष्यम् । "तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः, "संख्यातुं नैव शक्यन्ते गुणा दोषाश्च शार्ङ्गिणः । आनन्त्यात्प्रथमो राशिरभावादेव पश्चिमः" ॥ इत्यादिपरस्सहस्रवेदान्तस्मृतीतिहासपुराणागमादिप्रसिद्धापरिमितगुणसागरमपि तमेव सर्वप्रमाणविरोधेन गुणैर्दरिद्राणं शून्यम् "दरिद्रा दुर्गतौ" इत्यतः शानचि दरिद्राणमिति रूपम् । आहुरित्यन्वयः । ते हि निर्गुणश्रुतितात्पर्यमजानन्तस्सजातीयविजातीयस्वगतभेदशून्यं निर्गुणमेव ब्रह्म तदेवाविद्यापरिकल्पितं सगुणत्वमनुभवतीति कथयन्ति, तेषाम् " स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिभिर्विरोधः स्फुट एव । निर्गुणश्रुतितात्पर्यं वर्णितं श्रीवत्साङ्कमिश्रैः "दूरे गुणास्तव तु सत्त्वरजस्तमांसि तेन श्रुतिः प्रथयति त्वयि निर्गुणत्वम्" इति । अन्ये शैवाः । भिक्षौ स्वकुक्षिपूरणेऽप्यशक्ते भिक्षुके कपालिनीत्यर्थः । सुराजंभवं सुराजत्वम् । "कर्तृकर्मणोश्च भूकृञोः" इति भूधातोः खच्प्रत्यये कृते भावे सुराजंभवमिति रूपम् । आहुरिति हेलनम् " ब्रूञ् व्यक्तायां वाचि" इत्यस्माद्धातोः "ब्रुवः पंचानाम्" इत्यादिसूत्रेण आदादेशे लिट्परस्मैपदबहुवचनस्य झेरुसादेशे च कृते आहुरिति रूपम् । इति उक्तप्रकारेण तलैश्च तलैश्च प्रहृत्येदं युद्धं प्रवर्तते इति तलातलि तलप्रहारम् अकार्षुः अकुर्वन्मिथ इति शेषः । इति चेत्यत्र चकारेण गुणगुण्यभेदमुक्तितारतम्यवादादिना केचन तलातल्यकार्षुरिति ते च संगृह्यन्ते ॥ ११ ॥

हे श्रीरंगहर्म्याङ्गणकनकलते ! (अर्थात् श्रीरंगाख्य दिव्यविमानके अंगणप्रदेशका सुवर्णलतारूप यहां कनक इस पदसे औज्वल्य, लावण्य, सौंदर्य

सूचित किया और लता इसपदसे सौगंध्य, सौकुमार्य, यौवन सूचित किया) जो पुरुष आपके कटाक्षके लक्ष्य नहीं भया अर्थात् जिनके ऊपर जन्मजन्मांतरमें कभी क्षण भरभी आपका कटाक्ष न पडा वे अज्ञान अन्यथाज्ञान विपरीत ज्ञानसे व्याकुल होकर नाना प्रकारके विवादोंसे नष्टप्राय होते हैं सोई श्रीविष्णुपुराणमें लक्ष्मीजीके कटाक्षका फलभी कहा है कि " सः श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् । स शूरः स तु विक्रांतो यं त्वं देवि निरीक्षसे ॥ सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः । पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ " अर्थात् हे देवि ! वही श्लाघा करनेके योग्य है गुणवान् है धन्य है कुलीन है बुद्धिमान् है शूर है विक्रांत (पराक्रमी) है जिसको आप देखती हो और हे जगदंब ! हे विष्णु प्रिये ! शीलादि संपूर्णगुण उससे दूर होजाते हैं जिससे आप मुख फेर लेती हो, इस प्रकार तत्त्वज्ञानका हेतु आपका कटाक्ष न पडनेसे वे जडमति विरुद्धवाद करते हैं । सोई आगे दिखाते हैं कि, कोई वेदबाह्य सुगत चार्वाकादिक, अपौरुषेय (पुरुषने जिसको निर्माण न किया हो) नित्य, निर्दोष, समस्त पुरुषार्थको देनेवाले वेदोंको अप्रमाण कहते हैं । कोई कपिलमतावलंबी, विविध विचित्र भूमि, पर्वत, सरित्, समुद्रादि और ब्रह्मासे लेकर चेंटीपर्यंत सब विश्वको अराजक कहते हैं—वे ऐसे कहते हैं कि, प्रकृति और पुरुषही जगत्के कारण हैं पुरुषके सन्निधानसे प्रकृति अपनेसे व्यतिरिक्त तेवीस तत्त्वरूपसे विकारको प्राप्त होती है, प्रकृति पुरुषोंके सहित पचीस ही तत्त्व होते हैं इससे न्यारा कोई ईश्वर नहीं है ऐसा मानते हैं । कोई कणादमतावलंबी लोग, अनुमान सिद्ध निमित्तमात्र ईश्वर होनेसे विश्व सुराजक है ऐसा मानते हैं । अन्य मृषावादी (मायावादी) लोग " परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, यः सर्वज्ञः सर्ववित्, अपहतपाप्मा सत्यकामः सत्यसंकल्पः " इत्यादि वेदांत, स्मृति, इतिहास, पुराण, आगमादि हजारहों प्रमाणोंसे प्रसिद्ध अनंत कल्याण गुणगण परिपूर्ण ईश्वरको सब प्रमाणोंसे विरुद्ध गुणरहित (निर्गुण) मानते हैं वे निर्गुणवादी श्रुतियोंके तात्पर्यको न जानकर यों कहते हैं कि सजातीय विजातीय स्वगत भेद शून्य निर्गुणब्रह्मही अविद्या कल्पित (मायारचित) गुणोंको अनुभव करनेसे सगुण ब्रह्म कहा जाता है । आप्तवक्ता श्रीवत्सांकमिश्रने निर्गुण श्रुतियोंका तात्पर्य यों कहा है कि " दूरे गुणास्तव तु सत्त्वरजस्तमांसि तेन त्रयी प्रथयति त्वयि निर्गुणत्वम् " अर्थात् हे हरे ! सत्व रज तम इन तीन गुणोंसे आप दूर हो इसीसे श्रुति आपको निर्गुण कहती है इति । अन्य शैवलोग, पशुपति ही को

इस जगत्का ईश्वर कहते हैं। हे देवि ! इस प्रकार अपने अपने पक्षोंको प्रौढ करनेके लिये तलस्फोट पूर्वक विविध प्रकारका विवाद करते हैं हे देवि ! इन सब विवादोंका कारण केवल आपकी कटाक्षका अभावही है ॥ ११ ॥

त्वत्कटाक्षविषयताविधुराः मिथः प्रतिहता इत्युक्त्वा तद्विषयत्वभाग्यशालिनः त्वन्महिमानमनुभवन्तीत्याह—

पूर्वमें यह कह आये कि, जो लोग आपके कटाक्षके विषय नहीं हैं वे परस्पर नष्ट प्राय हैं एसा कहकर अब यह कहते हैं कि, जिनके ऊपर आपका कटाक्ष पडा वेही आपका गुणानुभव करते हैं—

मनसि विलसताऽक्ष्णा भक्तिसिद्धाञ्जनेन
श्रुतिशिरसि निगूढं लक्ष्मि ते वीक्षमाणाः ।
निधिमिव महिमानं भुञ्जते येऽपि धन्याः
ननु भगवति दैवीं संपदं तेऽभिजाताः ॥ १२ ॥

मनसीति—भगवति सकलकल्याणगुणसम्पन्ने ! ननु लक्ष्मि हे श्रीः ! धन्याः त्वत्कटाक्षविषयत्वरूपभाग्यवन्तः येऽपि ये केचन पुरुषाः । येऽपीत्यनेन तेषामतिशयो वाचामगोचर इति सूचितम् । भक्तिसिद्धाञ्जनेन भक्तिः युष्मत्स्वरूपरूपगुणविभूतिष्वनितरसाधारणप्रावण्यं सिद्धाञ्जनमिव गूढार्थप्रकाशकाञ्जनविशेष इव यस्य तेन भक्तिविशदीकृतेनेत्यर्थः । अत एव मनसि हृदये । विलसता प्रकाशमानेन अक्ष्णा दृष्ट्या ज्ञानेनेत्यर्थः । श्रुतिशिरसि वेदान्ते श्रुतिशिरसीति जात्येकवचनं श्रुतिशिरस्स्वित्यर्थः । निगूढं नितरां गूढं वेदरहस्यं वस्तुत्वादितिभावः । ते तव महिमानं स्वरूपरूपादिविभवम्, भक्तिसिद्धाञ्जनेन भक्तियुक्तं रचनायुक्तं सिद्धाञ्जनं सिद्धयञ्जनं यस्य तेन तथोक्तेन अत एव विलासता विशेषप्रकाशमानेन अक्ष्णा चक्षुषा श्रुतिशिरसि श्रवणकोणे निगूढं नितरां गूढं परश्रवणानभिज्ञं रहस्योपदिष्टमित्यर्थः । शिरसि निगूढमित्यनेन निधेः पर्वतशिरोनिगूढत्वमपि सूच्यते । तथाभूतं निधिमिव वीक्षमाणास्सन्तः । भुञ्जते अनुभवन्ति । निधिपक्षे भुक्तिर्धनविनियोगः महिमपक्षे तदनुसन्धानं वेदितव्यम् । ते पुरुषाः दैवीं संपदमभि मोक्षहेतुभूतदैवसंपदमभिमुखीकृत्य देवसंबन्धिनी सम्पद्दैवी देवा भगवदाज्ञानुवर्त्तनशीलास्तेषां संपत् सा च भगवदाज्ञानुवृत्तिरेव तामभिमुखीकृत्य जाता उपन्ना

भवन्तीति शेषः। कार्यात्कारणमनुमीयते इतिभावः। भगवति ! लक्ष्मि ! ते दवीं संपदमभिजाता ननु संपदुद्देशेनोत्पन्ना हीति वान्वयः। यथा निधिसंपदनुभावकभाग्यवत्तया तदुद्देशेनोत्पन्ना एव निध्यञ्जनाक्तदृशः पर्वतादिनिगूढं निधिं वीक्षमाणास्तमनुभवन्ति तथा दैवसंपदुद्देशेनोत्पन्ना एव भक्तिसिद्धाञ्जनस्फुरत्प्रबोधदृशा श्रुतिशिरोनिगूढं त्वन्महिमानं विलोक्यानुभवन्तीति भावः। अव श्रुतिशिरसि निगूढं निधिमिव दैवीं संपदमिति पदैः " तं दुर्दर्शं गूढमनुप्रविष्टम् गुहाहितं गह्वरेष्ठं पुराणम् " 'तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः " " दैवी संपद्विमोक्षाय निबन्धायासुरी मता ॥ " इति श्रुतिस्मृतिप्रमाणानि स्मारितानि ॥ १२ ॥

हे लक्ष्मि ! वे पुरुष धन्य हैं जिन्होंने आपकी स्वरूप रूप गुण वैभवोंको प्रकाश करनेवाली भक्ति रूप सिद्ध अंजनवाले, हृदयमें प्रकाशित ज्ञानरूप नेत्रोंके द्वारा पृथिवीमें दबेभये धनकी नाईं उपनिषदोंमें गूढ (छिपे) आपकी महिमा (स्वरूपादिकों) का अनुभव करते हैं. हे भगवति ! वे मोक्षका साधनभूत दैवीसंपत्वाले हैं अर्थात् भगवदाज्ञानुवृत्तिरूप दैवीसंपत्के ही उद्देश्यसे जन्मे हैं जैसे संपसत्मृद्धि भोगनेके भाग्यवाले पुरुष नेत्रोंमें किसी सिद्ध अंजनको लगाकर पर्वतादिकोंमें छिपे छिपाये धनको देखकर प्राप्त करलेते हैं और उसका भोगकरते हैं तैसेही दैवीसंपत् (भगवदनुभव) के उद्देश्यसे जिनका जन्म है वे महापुरुष उत्तमपुरुषार्थको प्राप्तकरनेवाली भक्तिरूप अंजनसे ज्ञानरूप नेत्रद्वारा वेदांतमें छिपे छिपाये आपकी महिमाको देखकर उसका अनुभव करते हैं।इसमें—"तं दुर्दर्शं गूढमनुप्रविष्टम्" इत्यादि श्रुतिभी प्रमाण है १२॥

प्राधान्येन श्रीसूक्तस्य श्रीसमृद्धिप्रतिपादकत्वं दर्शयन् पुरुषसूक्तादेरपि समृद्धिपरत्वं दर्शयति—

श्रीसूक्तमें प्रधानतासे श्रीजीके वैभवका प्रतिपादकत्व दिखातेभये पुरुषसूक्तादिकोंमें भी लक्ष्मीजीके ही महिमाका प्रतिपादन है. सो कहते हैं—

अस्येशाना जगत इति ते धीमहे यां समृद्धिं ।
श्रीः श्रीसूक्तं बहुमुखयते ताश्च शाखानुशाखम् ।
ईष्टे कश्चिज्जगत इति यः पौरुषे सूक्त उक्त-
स्तश्च त्वत्कं पतिमधिजगावुत्तरश्चानुवाकः ॥ १३ ॥

अस्येति—" अस्येशाना जगतः " इति श्रुत्यनुवादः । हे श्रीः ! विष्णुपत्नि ! अस्य जगतः ईशाना ईश्वरीत्यनया श्रुत्या ते तव यां समृद्धिम् ऐश्वर्यम् अधीमहे अधीतां कुर्महे । अधिपूर्वात् " इङ् अध्ययने " इति धातोरुत्तमपुरुषबहुवचनम् । तां समृद्धिं चेति चकारेणाधिकाश्च समृद्धिम् । श्रीसूक्तम् " हिरण्यवर्णां हरिणीम् " इत्यादिकम् । शाखानुशाखं शाखाऽनुगता शाखा यस्मिन्कर्मणि यद्यथा भवति तथा सर्वांशावच्छेदेनेत्यर्थः । बहुमुखयते बहुप्रकारं प्रतिपादयति । यद्वा" इदं हि पौरुषं सूक्तं सर्ववेदेषु पठ्यते " इत्युक्तप्रकारेण श्रीसूक्तमपि शाखानुशाखं स्थितमिति शेषः । सर्वासु वेदान्तशाखास्वधीतं सत् त्वत्समृद्धिं बहु मुखयते इत्यर्थः । तथाहि—हिरण्यवर्णां हिरण्यस्य वर्ण इव वर्णो यस्यास्तां तद्वत्पीतभास्वरा विग्रहवर्णाम् । अनेन विग्रहस्य निर्मलत्वप्रतीत्या हेयप्रतिभटत्वं सूचितम् । यद्वा हिरण्यमिव स्पृहणीयो वर्णः श्रीरिति शब्दो यस्यास्तां श्रीशब्दो हि षोढा व्युत्पत्ति सूचितत्वेन सर्वविधोपकारकस्ववाच्यवस्तुतया "शेष एष इति शेषताकृतेः प्रीतिमानहिपतिस्स्वनामनि " इत्युक्तशेषशब्द इव स्पृहणीयतमः । हरिणीं सुवर्णप्रतिमां तामिवोज्ज्वल्यसौन्दर्यलावण्यवतीम् । यद्वा हरिणीं मृगीं तद्वद्विशाललोचनाम् "योषिद्वृत्ताप्सरोभेदः सुवर्णप्रतिमा मृगी । हरिताश्च हरिण्यश्च स्युः' इति नानार्थरत्नमाला । हरिं नयति चेतनामिति चेतनानां भगवदाश्रयणे पुरुषकारभूतां वा हरिणीम् । सुवर्णरजतस्रजां तत्तद्दिव्यावयवोचितसुवर्णरजतादिमयदिव्यभूषणकलापाम् " आबन्तत्वं हलन्तानाम् " इतिभागुरिवचनात्स्रजामित्याबन्तत्वम् । चन्द्रां मुखे चन्द्रसदृशीम् आह्लादिनीं वा । " चदि आह्लादने " इति धातोः "इदित०" इति नुमागमे औणादिके रन्प्रत्यये " अजाद्यत०" इति टाप्यमि च चन्द्रामिति रूपम् । हिरण्मयीम् " तस्मिन्कामास्समाहिताः " इतिवद्धिरण्यस्पृहणीयकल्याणगुणगणप्रचुरां हिरण्यप्रभृतिसकलधनप्रचुरां वा लक्ष्मीं भगवतश्चेतनानां च संपदम् । यद्वा लक्ष्माण्युत्तमस्त्रीलक्षणान्यस्यास्सन्तीति लक्ष्मीस्ताम् । " चिह्नं लक्ष्म च लक्षणम् " इत्यमरः । अनपगामिनीं वात्सल्यातिशयेन दोषभूयस्त्वेऽप्यविमुक्तचेतनजाताम् । भगवन्नित्यानपायिनीं वा । अश्वाः पूर्वे प्रथमप्राकाराजिरस्थिता यस्यास्तामश्वपूर्वाम् । रथमध्यां रथाः मध्यमप्राकाराजिरस्था यस्यास्तां रथमध्याम् ।

हस्तिनादप्रबोधिनीं हस्तिनां ततोऽपि तृतीयप्राकाराजिरवार्तिनां दन्तिनां नादैर्बृंहितैः प्रबोधिनीं जागरणशीलाम् लक्ष्मीदिव्यनगरे प्रथमप्राकारावृतवीथ्यामश्वाः, द्वितीयप्राकारावृतवीथ्यां रथाः, तृतीयप्राकारावृतवीथ्यां हस्तिनश्च निवसन्ति। तत्र हस्तिनां तृतीयप्राकारान्तःस्थिततया तेषां लक्ष्मीदिव्यभवनसान्निध्यात्तन्नादैस्सुप्रातः प्रबुद्धा भवतीत्यर्थः। अनेन तस्या निरतिशयैश्वर्यं सूचितम्। यद्वा "कोणस्त्रगजैर्हेमकमलैरमृतोदकैः। सम्भृतैस्तर्प्यमाणां तां बोध्यमानाञ्च तैर्गजैः" इति, स्वायम्भुववचनरीत्या स्वासनपद्मदलस्थितहस्तिनादैरहरहः प्रबुद्ध्यमानाम् श्रियम् एवं निरङ्कुशैश्वर्येऽपि चेतनरक्षणतृष्णया भगवन्तमाश्रिताम्। तत्फलमाह—देवीमिति। देवयति क्रीडयति कान्तमिति देवी तां भगवतो भक्तदोषालक्ष्यीकरणाय तस्य क्रीडापारवश्यमापादयन्तीमित्यर्थः। तदयं श्रीपराशरभट्टार्योऽपि वक्ष्यति— "किमेतन्निर्दोषः क इह जगति" इत्यादिना कां कं सुखमस्या अस्तीति कां सुखरूपाम्। अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः। सर्वानुकूलस्वभावामित्यर्थः। तत्स्वभावमेव विशदयति—सोत्स्मितामिति। उत् अतिशयितं स्मितम् उत्स्मितम् उत्स्मितेन सह वर्तत इति सोत्स्मिता तां निस्सहापराधजननिश्शङ्कसंश्रयणाय नित्यव्यक्तमन्दहासाम्। अनेनानुग्रहमयीत्वं सूचितम्। तत्कार्यमाह—हिरण्येति। हिरण्यप्राकाराम् "अजायमानो बहुधा विजायते, स उ श्रेयान्भवति जायमानः" इतिवत्। "देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी। राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्मनि॥ अन्येषु चावतारेषु विष्णोरेषानपायिनी॥" इतीच्छाकृतोज्ज्वलानेकभगवदभिमतानुरूपविग्रहाम्। हिरण्मयप्राकारपरिवृतानन्दमयमहामणिमण्डपान्तर्निवासिनीं वा। आर्द्राम् अनुकूलविषये दयार्द्रदशाम् अनुकूलतेजसं वा। ज्वलन्तीं प्रतिकूलविषये ज्वलन्तीं तदभिभावकतेजोयुक्ताम्। "नित्यानुकूलमनुकूलनॄणां परेषामुद्वेजनं तव तु तेज उदाहरन्ति" इति श्रीवत्साङ्कश्रीसूक्तिः श्रीविषयेऽपि समाना। प्रतिकूलत्वं च प्रातिकूल्यकर्तृबुद्ध्या बोद्धव्यम्। तृप्तां स्वकृतेन भगवत्स्वरूपरूपगुणविभूत्यनुभवेन तत्संश्लेषजनितानन्देन वा तृप्ताम्। तर्पयन्तीं भगवत्कृतस्वरूपाद्यनुभवेन स्वसंश्लेषसुखेन वा तं तर्पयन्तीम्। स्वस्वकान्तोभयस्वरूपरूपगुणविभूत्यनुभवप्रापणेन संश्रितांस्तर्पयन्तीं वा। "आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ!" इत्युक्तचतुर्विधाधिकारिणस्तत्तदभिलषितप्रापणेन

तर्पयन्तीं वा । पद्मे स्थिताम् स्वसौन्दर्यसौगन्ध्यसौकुमार्यानुगुणसुन्दरसुगन्धसुकुमारसरसिजासनासीनाम् । पद्मवर्णाम् "नारीणामुत्तमा" इत्युक्तप्रकारेणोत्तमकान्तात्वेन पद्मारुणपाणिपादतलप्रान्तलोचनां पद्मसमविग्रहवर्णां वा । श्रियं सर्वैराश्रयणीयां चन्दयत्यानन्दयति चेतनानीश्वरञ्च स्वगुणैरिति चन्द्रा ताम् । प्रभासां भासो भासनं तदानन्दजनितहर्षसंभूत प्रकृष्टकान्तिम् "अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् । कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह" इतिवत् यशसा- संश्रितानां सर्वाभीष्टप्रापणकीर्त्या ज्वलन्तीं सोपबृंहणश्रुत्या लोके च प्रकाशमानाम् श्रियं जगद्गुणैर्योजयन्तीम्. देवजुष्टां देवे नारायणे "दिव्यो देव एको नारायणः" इति श्रुतेः । जुष्टां प्रीतां प्रेमसंपन्नां देवैर्ब्रह्मादिभिस्तत्तदभिलषितलाभाय जुष्टां सेवितां वा । "जुषी प्रीतिसेवनयोः" इत्युभयत्र धातुः। उदारां काङ्क्षाधिकदातृत्वलक्षणनिरतिशयौदार्याम्, ताम् उक्तवैभवयुक्ततया सर्ववेदान्तप्रसिद्धाम् । पद्मनेमीं नेमिः सुदर्शनम् "पवित्रं नेमिर्लोकद्वारं सुदर्शनम्" इति निघण्टुः । पद्मं नेमिरिव यस्यास्तां चक्राकारविकसितपद्मपाणिमित्यर्थः। यद्वा पद्ममेव नेमिर्नयनसाधनं यस्यास्ताम् । "नियो मिः" इत्यौणादिको मिप्रत्ययः । स्वकरस्थकमलेनाश्रितानामनिष्टमपनीय सर्वमिष्टमुपनीय स्वचरणाम्बुजे तान् प्रापयन्ती मित्यर्थः । एवमादि प्रकारेण श्रीसूक्तं श्रीसमृद्धिं बहुमुखयत इति बोध्यम् । ननु देवि श्रुतिमित्यादिना मत्समृद्धेः सर्वश्रुतिवेद्यतां प्रतिज्ञाय अस्येशाना जगतः श्रीसूक्तं बहुमुखयत इति पूर्वकाण्डस्थयत्किञ्चिद्वाक्यस्य श्रीसूक्तस्य च मत्समृद्धिप्रतिपादकत्वमुपपादितम् । तावता पुरुषसूक्तादिरूपायाः श्रुतेः कथं मत्समृद्धिपरत्वमित्यत आह—ईष्टइति । पौरुषे सूक्ते पुरुषसूक्ताख्योपनिषदि कश्चित्पुरुषो जगत ईष्टे जगत इति कर्मणि षष्ठी । जगन्नियमयतीत्यर्थः "ईश ऐश्वर्ये" इत्येतस्माद्धातोरदादिकाच्छपो लुकि लटस्तङि तकारस्यैत्वे "व्रश्च" इति षत्वे ष्टुत्वे च ईष्टइति रूपम् । अयं चार्थानुवादः "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् उतामृतत्वस्येशानः" इत्येव श्रवणादिति य उक्तः तं तत्प्रतिपादितं चेति चकारेण महानारायणमहोपनिषदादि प्रतिपादितं चेति लभ्यते । पुरुषमिति शेषः । उत्तरोऽनुवाकः, अद्भ्यः संभूतानुवाकः । चेतिचकारेण "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" "सुमज्जानये विष्णवे"

" श्रद्धया देवो देवत्वमश्नुते " इत्यादिवेदान्तवाक्यजातं च संगृह्यते । तच्च त्वत्कं तावकम् । पतिं स्वामिनम् । अधिजगौ अधिकं गायति स्म त्वत्पतित्वकृतसमृद्धि प्रत्यपादयदित्यर्थः । ततश्च तस्य त्वदधीनसमृद्धिकत्वात् तत्समृद्धिपराणां पुरुषसूक्तादीनां त्वत्समृद्धिपरत्वमिति साधूक्तम् । तस्य त्वदधीनसमृद्धिकत्वं च वक्ष्यति " त्वदायत्तर्द्धित्वेऽप्यभवदपराधीनविभवः" इति । अयं भावः—पुरुषसूक्तनारायणमहोपनिषदादिप्रतिपादितस्य महाविभवस्य भगवतो "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः" इति पुरुषसूक्ततुल्यानुपूर्व्यवगतदेवतैक्योऽद्भ्यः संभूतानुवाके "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति तदतिरिक्तवेदान्तवाक्यजातं च " ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" सुमज्जानये विष्णवे " " श्रद्धया देवो देवत्वमश्नुते" इत्यादिप्रकारेण च तस्य लक्ष्मीपतित्वं प्रत्यपादयत् । तद्वैभवं सर्वं लक्ष्मीपतित्वप्रयुक्तमवगमयतीति तत्समृद्धिपरा सर्वापि श्रुतिः श्रीसमृद्धिपरैव ॥ १३ ॥

हे श्रीः ! " अस्येशाना जगतः " अर्थात् इस जगत्की ईश्वरी, इस अर्थको सूचना करनेवाली श्रुतिसे जिस समृद्धि (ऐश्वर्य) को हमलोग पठन करते हैं उसी ऐश्वर्यको प्रतिपादन करनेवाला श्रीसूक्त सब शाखाओंमें पठित है अथवा "इदं हि पौरुषं सूक्तं सर्ववेदेषु पठ्यते" अर्थात् यह पुरुषसूक्त सब वेदोंमें पठित है इसी प्रकार "हिरण्यवर्णां हरिणीम्" इत्यादि वाक्योंसे श्रीजीकी समृद्धिको प्रतिपादन करनेवाला श्रीसूक्त भी सब वेदांतोंमें अनुगत होकर आपके वैभवको प्रतिपादन करता है और जो जगत्का नियंता (ईश्वर) पुरुषसूक्तमें कथित है वही पुरुष उत्तरानुवाकमें "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इस वाक्यसे आपका पति (स्वामी) कहा गया है. तथा नारायणोपनिषदादिकोंमें "सुमज्जानये विष्णवे श्रद्धया देवो देवत्वमश्नुते" इत्यादि वेदांत वाक्योंसे आपके पति होनेसे उन नारायणकी समृद्धिको कहा है सो इस विष्णुपत्नीत्वरूप विशेष संबंधसे विष्णुकी समृद्धिका कथन करनेवाली सब श्रुतियां आपकाही वैभव प्रतिपादन करतीं हैं । यहां ग्रंथविस्तारके भयसे संक्षेप टीका किया है विशेष अर्थ इसका संस्कृत टीकासे देखना ॥ १३ ॥

अत्यादरेणोपनिषत्प्रतिपाद्यतां वदन्नेव न केवलमुपनिषत्त्वद्वैभवं प्रतिपादयति, किन्त्वितिहासादयोपीत्याह--

अब इस श्लोकमें यह दिखाते हैं कि, केवल उपनिषद्हीमात्र आपका

वैभव नहीं प्रतिपादन करता है किंतु वेदका व्याख्यानरूप इतिहासादिकभी श्रीजीके वैभवसे प्राणधारण करते हैं–

उद्बाहुस्त्वामुपनिषदसावाह नैका नियन्त्रीं
श्रीमद्रामायणमपि परं प्राणिति त्वच्चरित्रे ।
स्मर्तारोऽस्मज्जननि यतमे सेतिहासैः पुराणै-
र्निन्युर्वेदानपि च ततमे त्वन्महिम्नि प्रमाणम् ॥ १४॥

उद्बाहुरिति–हे अस्मज्जननि ! असावुपनिषदेक इव श्रीसूक्तादिरूपा वैतालिक इव त्वमेव जगत्स्वामिनीति शपथं कुर्वाणेव वा उद्बाहुः उद्यतबाहुः सती त्वां नियन्त्रीं जगत्स्वामिनीं नाह किन्तु श्रीमद्रामायणमपि त्वच्चरित्रे परं तव चरित्रे सत्येव प्राणिति जीवति तव चरित्रप्रतिपादनरूपधारकेणैव जीवतीति भावः । यद्वा परमिति क्रियाविशेषणम् सोत्कर्षमित्यर्थः । त्वच्चरित्रे इत्यधिकरणे सप्तमी । तथा च रामादिचरित्रे प्राणिति जीवनमात्र धत्त त्वच्चरित्रे तु परं प्राणिति सोत्कर्षं जीवतीत्यर्थः । अतिशयितजीवनस्यैव फलत्वादिति हृदयम् । प्रपूर्वात् "अन प्राणने" इत्यस्माद्धातोः "रुदादिभ्यः सार्वधातुके" इति इटि णत्वे च कृते प्राणिति इति रूपम् । त्वच्चरित्रे परं प्राणितीत्यनेन "काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्" इति वाल्मीकिवचनं स्मारितम् । सीताचरित-महत्त्वं च त्वत्पुरुषकारोपयुक्तकृपापारतन्त्र्यानन्यार्हत्वप्रतिपादनेन कृपाप्रकाशनं रावणापहारकृते भगवता सीतायाः प्रथमवियोगे सुस्पष्टम् । तथा हि रावणवधा-नन्तरं रामविजयरूपप्रियाख्यापकतया संनिहितान्महोपकारात्तस्यामार्द्रापराधा-श्चित्रवधार्हा राक्षसीर्दृष्ट्वा तदपराधानुगुणं चित्रवधं कर्तुमुद्यतान्मारुतेः " पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम । कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥ " इत्याद्युपदेशेन तासां संरक्षणान्महती कृपा प्रकाशिता । स्वयं रावणगृहे बन्दी-भूय बन्दीकृतसुरसुन्दरीविमोचनाद्वा महती प्रकाशिता । द्वितीयविश्लेषे भर्तृ-नियमनानतिक्रमणेन वाल्मीक्याश्रमे तस्या निवासात्पारतन्त्र्यं प्रकाशितम् । तृतीयविश्लेषे, पतिपरित्यक्तायास्तस्याः पृथगाश्रयानवलम्बेन भूमौ प्रवेशादनन्यार्हत्वं प्रकाशितमिति कृत्स्नस्यापि श्रीरामायणस्य सीताचरितत्वं सिद्धम् । यतमे ये स्मर्तारः स्मृतिप्रणेतारः पराशरादयः । ततमेऽपि च तेऽपि । अपिचेत्येकं

पदम् । यत्तच्छब्दौ डतमच्प्रत्ययान्तौ सर्वनामसंज्ञौ । वेदान् तत्त्वहितपुरुषार्थवेद-कतया वेदशब्दवाच्यान् आम्नायान् सेतिहासैः इतिहाससहितैः इतिहासशब्देन भारतादिर्गृह्यते। श्रीरामायणस्य पूर्वमेव निर्देशात् । पुराणैः श्रीविष्णुपुराणादिभिः । त्वन्महिम्नि तव विभवे प्रमाणं भावप्रधानोयं निर्देशः । प्रमाणतामित्यर्थः । निन्युः नयन्ति स्म । वेदानां त्वन्महिमवेदकतया तत्प्रमाणतां स्मृतीतिहासपुराणैः पराशरादयोऽदर्शयन्नित्यर्थः । निन्युरिति निञो द्विकर्मकत्वात्कर्मद्वयम् ॥ १४ ॥

हे अस्मज्जननि ! यह केवल उपनिषद्ही शपथ करनेवालोंके सदृश बाहु उठाकर श्रीसूक्तकी नाईं आपको जगत्का नियंत्रीत्व (ईश्वरीत्व) नहीं कहता है । किंतु "वेदवेद्ये परे पुंसि जाते दशरथात्मजे । वेदः प्राचसादासीत् साक्षाद्रामायणात्मना ॥ " अर्थात् वेदसे जाननेके योग्य सत् ब्रह्म आत्मशब्द-वाच्य परब्रह्म नारायण जब दशरथात्मजत्वको प्राप्त भये तब वेदभी वाल्मिकी महर्षिके द्वारा रामायणरूपसे प्रगट भया । इस प्रमाणसे वेदरूप रामायणभी 'सीतायाश्चरितं महत्' सीताजीके चरित्रका मुख्यत्व होनेसे 'देवत्वे देवदेहेयं मानुषत्वे च मानुषी' देवावतारमें देवी–मनुष्यावतारमें मानुषीरूपको धारण करनेवाली श्रीजीके चरित्रोंसे उज्जीवनको प्राप्त होताहै और हे अंब ! स्मृतियोंके प्रवर्त्तक जितने पराशरादि महर्षि हैं वे सब भी भारतादि विष्णुपुराणादिकोंके सहित वेदोंको आपकी महिमामें प्रमाण लेते हैं ॥ १४ ॥

इत्थं लक्ष्मीविभवे सपरिकरं प्रमाणमुपन्यस्य तत्प्रतिपन्नं तदैश्वर्यमाह–

इस प्रकार लक्ष्मीजीके वैभवमें सांगोपांग प्रमाणका उपन्यास करके तिनसे सिद्ध ऐश्वर्यको दिखाते हैं–

आकुग्रामनियामकादपि विभोरासर्वनिर्वाहका-
दैश्वर्यं यदि होत्तरोत्तरगुणं श्रीरङ्गभर्तुः प्रिये ।
तुङ्गं मङ्गलमुज्ज्वलं गरिमवत्पुण्यं पुनः पावनं
धन्यं यत्तदद्श्च वीक्षणभुवस्ते पञ्चषा विप्रुषः ॥ १५ ॥

आकुग्रामेति–हे श्रीरङ्गभर्तुः प्रिये श्रीरङ्गराजवल्लभे ! आकुग्रामनियामकात् कुग्रामनियामकमारभ्य । कुग्रामो ग्रामवाटिका पल्लीत्यर्थः।सर्वनिर्वाहकात् सर्वलोक शासितुः । आविभोरपि ब्रह्मपर्यन्तम् । उत्तरोत्तरगुणं उत्तरोत्तरातिशयितम् ।

यदश्वर्यमस्ति तुङ्गम् उन्नतं मर्वादि, मङ्गलं चन्दनकुसुमादि। उज्ज्वलं मणिद्युमणिद्वीपादि। गरिमवत् गुरुत्वगुणयुक्तं हिमवन्मन्दरादि। पुण्यं परलोकसाधनभूतं यज्ञादि। पुनः भूयः पावनं पवित्रीकुर्वत् कावेरीप्रभृति। धन्यं भाग्यफलभूतं नवनिधिरूपं चेति यदैश्वर्यमस्ति तत्पूर्वोक्तं कुग्रामाधिपप्रभृति सर्वप्रभुपर्यन्तैश्वर्यम्। अदश्च इदं तुङ्गाद्यैश्वर्यम्। चेति चकारेणानुक्तमन्यदप्यैश्वर्यम्। ते तव। वीक्षणभुवः कटाक्षकन्दलिताः। पञ्च वा षड्वा मानं येषां ते पञ्चषाः। "संख्ययाव्ययेति" सूत्रेण बहुव्रीहिसमासे "बहुव्रीहौ संख्येये" इत्यादि सूत्रेण डचि "टेः" इति टिलोपे पञ्चषा इति रूपम्। विप्रुषो बिन्दवः लेशा इत्यर्थः। लोके समीचीनं सर्वं वस्तु त्वत्कटाक्षलेशायत्तमित्युक्तं भवति॥ १५॥

हे श्रीरंगराजप्रिये! एक छोटे ग्रामसे लेकर चतुर्दशभुवनाधिपति ब्रह्मापर्यंत उत्तरोत्तर (ऊपर ऊपर) ऐश्वर्य, और मेरु आदिक ऊंचा द्रव्य, चंदनादिक मंगलवस्तु, मणि सूर्य दीपादि उज्ज्वल पदार्थ हिमवान् मंदरादिक बोझवाला वस्तु, पुण्य परलोकका साधन यज्ञादिक, पवित्र करनेवाली गंगा, कावेरी आदिक, धन्य नवनिधि आदिक जितने पूर्वोक्त ऐश्वर्य हैं ये सबभी तुम्हारे कटाक्षसे उत्पन्न पांच छः बिंदुओंकेही विस्तार हैं अर्थात् लोकमें जितने समीचीन (उत्तम) वस्तु हैं वे सबही आपके कटाक्षके आधीन हैं॥ १५॥

संप्रत्यैश्वर्यदारिद्र्ययोर्लक्ष्मीकटाक्षतदभावहेतुकतामुदाहरति—

अब ऐश्वर्यका हेतु श्रीजीका कटाक्ष और दारिद्रताका हेतु इसका अभाव है सोई दर्शाते हैं—

एको मुक्तातपत्र[१]प्रचलमणिघणात्कारिमौलिर्मनुष्यो
दृप्यद्दन्तावलस्थो न गणयति नतान् यत्क्षणं क्षोणिपालान्।
यत्तस्मै तिष्ठतेऽन्यः कृपणमशरणो दर्शयन् दन्तपङ्क्तिं
तत्ते श्रीरङ्गराजप्रणयिनि! नयनोदञ्चितन्यञ्चिताभ्याम्॥ १६॥

एक इति। हे श्रीरङ्गराजप्रणयिनि! एको मनुष्यः। दृप्यद्दन्तावलस्थो मदद्विरदमस्तकस्थितः मुक्तातपत्रप्रचलमणिघणात्कारिमौलिः मुक्तातपत्रे मौक्तिकच्छत्रे गजगमनेन प्रचलैर्मणिभिर्घट्टनेन घणात्कारिभिः शब्दायमानो मौलिः कोटीरं यस्य स तथोक्तस्सन् नतान् नम्रान् क्षोणिपालान् नानामण्डलाधिपतीन् न गणय-

१ प्रचुरमणिघणत्कारि इति पाठान्तरम्।

तीति यत्, इयमैश्वर्यकाष्ठा। अथ दारिद्र्यकाष्ठामाह–अन्य इति। अन्यः इतरो मनुष्यः अशरणो रक्षकान्तररहितस्सन् कृपणं दैन्यप्रकाशो यथा भवति तथा। दन्तपंक्तिं दर्शयन् तस्मै दन्तावलस्थिताय पुरुषाय। तिष्ठते स्वाभिप्रायं प्रकटयन्नास्ते। इति यत्तदुभयं क्रमेण ते तव नयनोदञ्चितन्यञ्चिताभ्यां नयनयोरुदञ्चितेन कटाक्षेण न्यञ्चितेन सङ्कोचेन च भवतीति शेषः ॥ १६ ॥

हे श्रीरंगराजप्रणयिनि ! एक मनुष्य वह है जो सब अलङ्कारोंसे युक्त मत्त हस्तीके ऊपर बैठा है और उस हस्तीके चलनेसे जिसके मस्तकके ऊपर मुक्ता मणिमय छत्रमें जटित मणियोंके झालरोंके हलनेसे तथा किरीटमें टक्कर लगनेसे जिसमें घणघण शब्द होरहाहै ऐसा मणिमय सुंदर किरीट है मस्तकपर जिसके और अपने समीपमें अपने बहुमान्यक निमित्त विविध भेटियोंको हाथोंमें लिये शिर झुकाये खडे देशदेशांतरोंके मंडलेश्वरोंको जो भलीभांति देखताभी नहीं यह ऐसा ऐश्वर्यवालाहै और एक ऐसा दरिद्री मनुष्य है कि, जिसको कहीं भी रहनेका ठिकाना नहीं, कोई रक्षक नहीं, अपनी कृपणताको प्रगट करते हाथजोडकर दाँतोंको दर्शाते उस हस्तीपर बैठनेवाले पुरुषसे याचना कररहा है इन दोनोंका कारण केवल आपके कटाक्षका विकास संकोच ही हे अर्थात् जिसके ऊपर आपका कटाक्ष पडा वह ऐसा ऐश्वर्यवाला होता भया और जिसके ऊपर कटाक्ष नहीं पडा वह ऐसा दरिद्री होगया ॥ १६ ॥

" स श्लाघ्यस्स गुणी धन्यस्स कुलीनस्स बुद्धिमान्। स शूरस्स च विक्रान्तो यं त्वं देवि निरीक्षसे ॥ " इत्युक्तप्रमाणानुसारेण सर्वसंपदां लक्ष्मीभ्रूविलासप्रसराभिमुखजङ्घालतामाह–

" स श्लाघ्यः स गुणी धन्यः " अर्थात् वही पुरुष सब गुण समृद्धियोंसे संपन्न है जिसके ऊपर लक्ष्मीजीका कटाक्ष है इस विष्णुपुराणवचनसे. सब समृद्धियोंका मूल लक्ष्मीजीका कटाक्षही है, सो कहते हैं–

रतिर्मतिसरस्वतीधृतिसमृद्धिसिद्धिश्रियः
सुधासखि ! यतोमुखं विचलिषेत्तव भ्रूलता।
ततोमुखमथेन्दिरे ! बहुमुखीमहंपूर्विकां
विगाह्य च वशंवदाः परिवहन्ति कूलङ्कषाः ॥ १७ ॥

रतिरिति–हे सुधासखि अमृतसोदरे ! अनेन मधुरतमत्वं जगदुज्जीवन-

हेतुत्वं च व्यञ्जितम् । हे इन्दिरे ! तव भ्रूलता यतोमुखं यत्पुरुषाभिमुखं चिचलिषेत् चलितुमिच्छेत् । चलनं विनापि चलनेच्छायामेव । ततोमुखं तत्पुरुषाभिमुखं रतिः प्रीतिः मतिसरस्वतीधृतिसमृद्धिसिद्धिश्रियः मतिर्ज्ञानं सरस्वती वाक् वागाधिदेवता च धृतिः स्थैर्यं समृद्धिः परिपूर्णत्वं सिद्धिरभिलषितावाप्तिः श्रियः संपदश्च अथ साकल्येन " प्रश्नकार्त्स्न्येष्वथो अथ " इत्यमरः । बहुमुखीं बहुप्रकाराम् । अहंपूर्विकां अहंपूर्वंप्रवहाम्यहं पूर्वमित्यहन्तां विगाह्य प्रविश्य वशंवदाः विधेयाः सत्यः । कूलङ्कषाः उद्वेलाः । परिवहन्ति पुत्रपौत्रशिष्यप्रशिष्यपर्यन्तं प्रसरन्तीत्यर्थः । " सर्वकूलाभ्रकरीषेषु कषः " इति खच्प्रत्यये मुमागमे च कृते कूलङ्कषा इति रूपम् ॥ १७ ॥

हे सुधासखि ! (अमृतसहोदरि) आपकी भ्रुकुटीरूपा लता जिस पुरुषके ओरको चलनेकी इच्छा करती है उसी ओर रति (प्रीति) मति (ज्ञान) तथा सरस्वती (वाक्की अधिष्ठातृदेवता) धृति (धीरता स्थिरता) समृद्धि (परिपूर्णता) सिद्धि (वांछित फलकी प्राप्ति) श्री (संपत्) इत्यादि ये सबभी हे इंदिरे ! हम पहिले जायंगी हम पहिले जांयगी ऐसा कहकर उस पुरुषके पुत्रपौत्र शिष्य प्रशिष्य पर्यंतभी आधीन होजाती हैं ॥ १७ ॥

सर्ववस्तुनीचोच्चभावो लक्ष्मीकटाक्षविकाससंकोचायत्त इत्याह—

समस्त जगतमें जो कुछ उत्तम मध्यम वस्तु हैं वे सबभी श्रीजीके कटाक्षके विकास संकोचके आधीन हैं, सो कहते हैं—

सह स्थिरपरित्रसव्रजविरिञ्चनाकिञ्चनै-
रनोकहबृहस्पतिप्रबलविक्लवप्रक्रियम् ।
इदं सदसदात्मना निखिलमेव निम्नोन्नतं
कटाक्षतदुपेक्षयोस्तव हि लक्ष्मि ! तत्ताण्डवम् ॥ १८ ॥

सहेति । हे लक्ष्मि ! स्थिरपरित्रसव्रजविरिञ्चनाकिञ्चनैः सह स्थिराः स्थावराः शैलवृक्षादयः परित्रसाः परिस्पन्दनशीलाः जङ्गमाः तेषां व्रजैः समूहैः विरिञ्चनो ब्रह्मा अकिञ्चनो दरिद्रस्तैः सह अनोकहाः वृक्षाः बृहस्पतिर्गुरुः प्रवरो बलवान् विक्लवो दुर्बलः तेषां प्रक्रिया प्रकारो यस्मिंस्तत्तथोक्तम् । इदं परिदृश्यमानं जगत् निखिलमेव समस्तमपि सदसदात्मना समीचीनासमीचीनरूपेण निम्नोन्नतं नीचोच्चम् इति यत्तत्तव कटाक्षतदुपेक्षयोः वीक्षणावीक्षणयोः ताण्डवं नटनं हि॥ १८ ॥

हे लक्ष्मि ! स्थावर जंगमोंके समूहोंके सहित ब्रह्मासे लेकर दरिद्री पर्यंत तथा वृक्षोंसे लेकर बृहस्पति पर्यंत, बलवान्से लेकर दुर्बल पर्यंत, यह सब जगत् बुरा भला तथा नीच ऊंच भावकरके जो कुछ देखनेमें आता है सो सबभी आपके कटाक्षके विकाश संकोचका नाटय है अर्थात् जिसके ऊपर कटाक्ष पडा वह एतादृश ऐश्वर्यवाला भया और जिसके ऊपर नहीं पडा वह ऐसी निर्हीनताको प्राप्त भया ॥ १८ ॥

संप्रति भगवतो जगत्सृष्टिर्लक्ष्मीविहारायेत्याह—

भगवान्की जगत्सृष्टि लक्ष्मीजीके विहारके लिये है, सो कहते हैं—

काले शंसति योग्यतां चिदचितोरन्योन्यमालिङ्गतो-
भूताहङ्कृतिबुद्धिपञ्चकरणीस्वान्तप्रवृत्तीन्द्रियैः।
अण्डानावरणैः सहस्रमकरोत्तान् भूर्भुवः स्ववतः
श्रीरङ्गेश्वरदेवि ते विहृतये सङ्कल्पमानः प्रियः ॥ १९ ॥

काल इति। हे श्रीरङ्गेश्वरदेवि ! काले सर्गाद्यसमये योग्यतां सृष्ट्यौन्मुख्यं शंसति सति स्रष्टुमयमवसर इति सूचयति सति चिदचितोः प्रकृतिपुरुषयोः। अन्योन्यमालिङ्गतोः मिथो मिलितयोः सतोः प्रियः श्रीरङ्गराजः संकल्पमानो "बहु स्यां प्रजायेय" इति बहुभवनसङ्कल्पं कुर्वन् ते विहृतये भूताहङ्कृतिबुद्धिपञ्चकरणीस्वान्तप्रवृत्तीन्द्रियैः भूतानि पृथिव्यादीनि अहंकृतिः प्रकृतिविकाररूपं अहङ्कारतत्त्वं बुद्धिर्महत्तत्त्वं पञ्चानां करणानां समाहारः पञ्चकरणी पञ्च ज्ञानेन्द्रियाणि स्वान्तं मनः प्रवृत्तीन्द्रियाणि वागादिपञ्चकर्मेन्द्रियाणि तैः सह आवरणैः सप्तावरणैः समम्, तान् प्रसिद्धान्, भूर्भुवः स्ववतः त्रैलोक्यवतः, सहस्रमण्डान् अनन्तान् अकरोत् कृतवान् ॥ १९ ॥

हे श्रीरंगेश्वरदेवि ! सर्गके आदिमें सृष्टि होने योग्य समयको देखकर आपके प्रिय श्रीरंगराजने परस्परमें संमिलित (एकत्व) होकर रहनेवाले चेतनाचेतनों (जीवजडों) को 'एकोऽहं बहुस्याम्' इस प्रकार बहुभवन संकल्प पूर्वक आपके विहार (लीला) के लिये पृथिव्यादि पंचभूत, अहंकार, महत्तत्त्व, श्रोत्रादि पंचज्ञानेंद्रिय, मन, वागादि पंचकर्मेन्दिय और सप्तावरणोंके सहित ब्रह्माण्ड तिसमें भूलोक भुवर्लोक स्वर्गलोकादिक स्थानोंके सहित अनंत ब्रह्मांडोंको रचाहै ॥ १९ ॥

"विचित्रा देहसंपत्तिरीश्वराय निवेदितुम्" इत्युक्तप्रमाणानुसारेण करणकलेवरयोगरूपभगवत्कैङ्कर्यार्थत्वेऽपि तद्विस्मृत्य तानि करणानि शब्दादिप्रवणानि कुर्वाणानात्मनो भगवानेव तथाभूतान्कारयंस्तव परिहासरसमुत्पादयतीत्याह–

ईश्वरने इस विचित्र देहकी सृष्टि अपने सेवाके निमित्त किया है, इस बातको भूलकर विषयानुभवमें व्यर्थ आयु खोनेवाले जीवोंको कर्मानुगुण ईश्वरही श्रीजीके परिहासरसके लिये भरमाय रहे हैं, सो कहते हैं–

शब्दादीन्विषयान्प्रदर्श्य विभवं विस्मार्य दास्यात्मकं
वैष्णव्या गुणमाययात्मनिवहान्विप्लाव्य पूर्वः पुमान् ।
पुंसा पण्यवधूविडम्बिवपुषा धूर्तानिवायासयन्
श्रीरङ्गेश्वरि कल्पते तव परीहासात्मने केलये ॥ २० ॥

शब्दादीनिति–हे श्रीरङ्गेश्वरि श्रीरङ्गराजप्रिये ! पूर्वः पुमान् पुराणपुरुषः श्रीरङ्गराजः शब्दादीन् शब्दस्पर्शरूपरसगन्धान् विषयान् प्रदर्श्य दर्शयित्वा दास्यात्मकं दास्यत्वरूपं विभवम् ऐश्वर्यं विस्मार्य विस्मृतं कृत्वा वैष्णव्या विष्णुसंबन्धिन्या स्वकीययेत्यर्थः । "मम माया दुरत्यया" इत्युक्तेः । गुणमायया त्रिगुणात्मिकया प्रकृत्या । अत्र मायाशब्दो विचित्रसृष्टिनिबन्धनः । "देवमायेव निर्मिता" इतिवत् । आत्मनिवहान् जीवसमूहान् विप्लाव्य वञ्चयित्वा पण्यवधूविडम्बिवपुषा वेश्यानुकारिशरीरवेषेण पुंसा पुरुषेण धूर्तानिव धृष्टपुरुषानिव आयासयन् विवशान् कुर्वन् भगवानेवात्मनिवहान् धूर्तांश्चायासयति गुणमायावेश्यानुकारिपुरुषश्च द्वारमात्रमिति भावः। तव परीहासात्मने परिहासरसरूपाय केलये विहाराय कल्पते समर्थो भवति ।"कृपू सामर्थ्ये" इत्यस्माद्धातोः "कृपो रो लः" इति लकारे कल्पत इति रूपम् । केचित्तु धूर्तानिवायासयन्नित्यत्र धूर्तानायासयन् सूत्रधार इवेति योजयन्ति तच्चिन्त्यम् सूत्रधारपदाध्याहारप्रसङ्गात् । धूर्तानिवेति धूर्तपदान्वितस्येवशब्दस्याध्याहृतसूत्रधारपदान्वये व्यवहितान्वयश्च तव परीहासात्मने केलये कल्पत इति वचनानुपपत्तिश्च । सूत्रधारस्य लक्ष्मीपरिहासरसापादने दृष्टान्तत्वायोगात्। न हि लोकस्य परिहासरसमापादयन्सूत्रधारो लक्ष्म्या अपि तमापादयति येन तस्य दृष्टान्तता स्यात् । न च लोकस्येत्यध्याहृत्य पण्यवधूविडम्बिवपुषा पुंसा धूर्तानापादयन् सूत्रधारो लोकस्येव गुणमाययाऽऽत्मनिवहान् विप्लाव्य पूर्वः

पुमान् तव परीहासात्मने केलये कल्पत इति योजना क्रियत इति वाच्यम्; तथासत्याविष्कृतमेव व्याख्यानकौशलं पण्डितंमन्यैः प्रथमान्तषष्ठ्यन्तपदद्वयाध्याहारदोषादिवशब्दस्य लोकरदान्वयेनात्यन्तव्यवधानदोषाच्च । अव्यवधानेनानध्याहारेण च वाक्यार्थवर्णनसंभवे व्यवधानाध्याहारकल्पनानौचित्याच्च तथाकल्पने विशेषस्वारस्यासिद्धेश्च । न च त्वत्पक्षापेक्षया दृष्टान्तदार्ष्टान्तिकभेदसिद्धिरेवास्मत्पक्षे विशेषसिद्धिरिति वाच्यम्; धूर्तायासयितृत्वात्मनिवहविप्लावकत्वरूपभिन्नविशेषणविशिष्टवेषेणैकस्यैव दृष्टान्तदार्ष्टान्तिकभावे स्वारस्याक्षतेश्चेत्यलं पल्लवितेन ॥२०॥

हे श्रीरङ्गेश्वरि ! पुराण पुरुष (परमात्मा) ने शब्दादि विषयोंको देखाकर अपनी गुणमयी वैष्णवी मायासे जीवोंके स्वाभाविक दास्य रूप ऐश्वर्यको भुलाकर जीवोंको वंचन करके, जैसे कोई पुरुष वेश्याका वेष अलंकारोंको धारण करिके लंपट धूर्तजनोंको विवश करता है तैसेही भगवान्भी तुम्हारे विहारार्थ इस संसारमें धूर्त जीवोंको मोहित करते हैं अर्थात् इस लीलाविभूतिमें जीवोंका वैचित्र्य लक्ष्मीजीके लीला निमित्त है ॥ २० ॥

इत्थं लक्ष्म्या लीलाविभूत्युपयोगमुक्त्वा नित्यविभूतियोगमाह—

इस प्रकार लक्ष्मीजीके उपयोगके निमित्त लीला विभूतिको कहकर नित्यविभूति (परंपद) का उपयोग कहते हैं—

यद्दूरे मनसो यदेव तमसः पारे यदत्यद्भुतं
यत्कालादपचेलिमं सुरपुरी यद्गच्छतो दुर्गतिः ।
सायुज्यस्य यदेव सूतिरथवा यद्दुग्रहं मद्गिरां
तद्विष्णोः परमं पदं तव कृते मातः समाम्नासिषुः ॥ २१ ॥

यदिति—हे मातः ! यत् स्थानम् । मनसो दूरे स्मर्तुमशक्यमित्यर्थः । मनस इत्यसङ्कोचेनोक्तेः । ब्रह्मादीनामपि वाङ्मनसागोचरत्वं विवक्षितम् । तदुक्तं श्रीभाष्यकारैः—"ब्रह्मादीनां वाङ्मनसागोचरे श्रीमति वैकुण्ठे" इति । यत्तमस इति । यत्तमसः प्रकृतिमण्डलस्य पार एव परस्तादेव । एवकारेण रजस्तमोलवस्पर्शोऽपि नेति सूचितम् । यदेव तमसः पारे यत्पदमेव प्रकृतिमण्डलपारवर्त्ति ब्रह्मादीनां पदं तु न तथेति विशेष्य सङ्गत एववायमेवकारः । "क्षयं तमस्यरजसः पराके" इति श्रुतेः । रजस्तमश्शब्दौ तत्तद्गुणप्रधानप्रकृतिवाचिनौ यदत्यद्भुतम् अत्या-

श्चर्यावहम् यत्कालादपचेलिमं यत्कालाद्धेतोरपचेलिमम् अपरिपक्वम् । अकालकाल्यं ' न कालस्तत्र वै प्रभुः " इति स्मृतेः । प्रभुत्वं परिपाकहेतुत्वं सुरपुरी सुराणां ब्रह्मादीनां पुरी वैराजा अमरावत्यादिरूपा यद्दृच्छतः यत्स्थानं गच्छतः पुंसो दुर्गतिः नरकः " एते वै निरयास्तात स्थानस्य परमात्मनः " इति स्मृतेः । सायुज्यस्य परमपुरुषसाम्यापत्तेः यदेव यत्स्थानमेव सूतिरुत्पादकं न वितरदित्यर्थः । अथवा किमेतैर्लक्षणरिदमेव तल्लक्षणमित्याह यद्ग्रहमिति । मद्गिरां मद्वाचां य ग्रहमगोचरं विष्णोः परवासुदेवस्य तत्परमं पदम् अत्युत्कृष्टस्थानं तव कृते त्वदर्थं त्वन्नित्यवासार्थमित्यर्थः । समाम्नासिषुः अभ्यस्तवन्तः । वेदा इति शेषः । संपूर्वात् " मा अभ्यासे" इत्यस्माद्धातोर्लुङि च्लेः सिचि "यमरम०" इत्यादिना इट्सकोः कृतयोः " आदेशप्रत्यययोः " इति षत्वे झेर्जुसि समाम्नासिषुरिति रूपम् । " तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इति श्रुतिरिह प्रमाणं द्रष्टव्यम् ॥ २१ ॥

हे मातः ! जो स्थान (परंपद) ब्रह्मादिकोंके मनका अगोचर है जो प्रकृतिसे परे है अति आश्चर्य रूप है तथा जिसको कालभी नहीं पकासकता अर्थात् जहां कालकीभी गति नहीं जिस स्थानके देखते ब्रह्मलोकादिकभी नरक सदृश हैं तथा जो स्थान परम पुरुष परमात्माको साम्यापत्ति (सायुज्यमुक्ति) का कारण है जो हमलोगोंके वचनोंका अगोचर है एतादृश विशेषणविशिष्ट जो विष्णुका परंपद है सो हे जननि ! तुम्हारे निमित्त है ऐसा वेदोंने बारंबार कहा है ॥ २१ ॥

सेश्वरं विभूतिद्वयं तद्वर्तिवस्तुजातं च लक्ष्मीपरिकरभूतमित्याह–

ईश्वर सहित दोनों विभूति तथा दोनों विभूतिके अंतर्गत सम्पूर्ण वस्तु लक्ष्मीजीका परिकर (सामग्री) है सो कहते हैं–

हेलायामखिलं चराचरमिदं भोगे विभूतिः परा
पुण्यास्ते परिचारकर्मणि सदा पश्यन्ति ये सूरयः ।
श्रीरङ्गेश्वरदेवि केवलकृपानिर्वाह्यवर्गे वयं
शेषित्वे परमः पुमान् परिकरा ह्येते तव स्फारणे ॥ २२ ॥

हेलायामिति हे–श्रीरङ्गेश्वरदेवि श्रीरङ्गराजप्रिये ! अखिलं चराचरं जङ्गमस्थावरात्मकमिदं परिदृश्यमानं जगत् तव हेलायां क्रीडायां विनियुक्तं " हरे ! विहरसि क्रीडाकन्दुकैरिव जन्तुभिः " इत्युक्तेः । परा उत्कृष्टा परममहती वा

" त्रिपादस्यामृतं दिवि " इति श्रुतेः । विभूतिः शुद्धसत्त्वरूपा तव भोगे विनियुक्ता भोग्यभोगोपकरणभोगस्थानत्वेन विनियुक्तेत्यर्थः । त्वां त्वत्प्रियं च ये सदा पश्यन्ति साक्षात्कुर्वन्ति । पुण्याः युष्मत्सदानुभवहेतुसुकृतशीलास्ते सूरयो विष्वक्सेनादयः ते तव परिचारकर्मणि विनियुक्ताः वयं बुभुक्षुमुमुक्षुभेदभिन्नाः जीवाः तव केवलकृपानिर्वाह्यवर्गे त्वन्निर्हेतुककृपानिर्वाहकर्मीकृतानां वर्गे सन्ततौ विनियुक्ताः । परमः पुमान् परमः पुरुषः । त्वत्प्रियः तव शेषित्वे विनियुक्तः । इत्येते पूर्वोक्ताः सर्वेपि तव स्फारणे व्याप्तौ त्वद्विभव इत्यर्थः । परिकरा हि उपकरणभूताः । खलु हि इत्याश्चर्यं ॥ २२ ॥

हे श्रीरंगेश्वरदेवि ! यह जो स्थावर जंगमात्मक जगत् देखनेमें आता है सो आपकी क्रीडा है, परविभूति (परंपद) भोगका साधन है, सर्वदा देखनेवाले परममंगलरूप अनंत गरुड विषक्सेनादिक आपकी परिचर्याकर्म (सेवा) के साधन हैं, मुमुक्षु (मोक्ष इच्छावाले) बुभुक्षु (विषयादि भोगनेकी इच्छावाले) भेदसे भिन्न हमलोग कृपा और निर्वाहके विषय हैं, परमपुरुष नारायण आपके शेषी (स्वामी) हैं । हे श्रीरंगराजप्रिये ! ये सबभी आपके वैभवकी सामग्री हैं ॥ २२ ॥

श्रीश्रीपत्योः परमव्योम्नि वैकुण्ठनगरीयोगमाह—

परमपद (श्रीवैकुंठ) लक्ष्मी और लक्ष्मीपति दोनोंकी राजधानी है सो कहते हैं—

आज्ञानुग्रहभीमकोमलपुरीपाला फलं भेजुषां
याऽयोध्येत्यपराजितेति विदिता नाकं परेण स्थिता ।
भावैरद्भुतभोगभूमगहनैः सान्द्रा सुधास्यन्दिभिः
श्रीरङ्गेश्वरगेहलक्ष्मि ! युवयोस्तां राजधानीं विदुः ॥२३॥

आज्ञेति—हे श्रीरङ्गेश्वरगेहलक्ष्मि ! श्रीरङ्गेश्वरदिव्यविमानालङ्करणभूते ! या पुरी आज्ञानुग्रहभीमकोमलपुरीपाला आज्ञया शासनेन अनुग्रहेण दयया यथाक्रमं भीमाः भयंकराः कोमलाः सौम्याः पुरीपालाः नगररक्षकाः यस्याः सा तथोक्ता । भेजुषां भजताम् फलं भक्तानां प्रपन्नानां च स्वतः पुरुषार्थभूता अयोध्येत्यपराजितेति योद्धुमशक्येति परैरजितेति च हेतोर्या तत्तदाख्यया विदिता

प्रसिद्धा श्रुताविति शेषः। "देवानां पूरयोध्या" इति "विशालापराजिता" इति च श्रुतेः। नाकं परेण नाकस्य परमाकाशस्य परेण उपरिष्टात् परमव्योम्नीत्यर्थः। स्थिता वर्तमाना "परेण नाकं निहितं गुहायाम्" इति श्रुतेः। सुधास्यन्दिभिः अमृतस्राविभिः भोग्यतमैरित्यर्थः। अद्भुतभोगभूमगहनैः अद्भुतभोगानाम् आश्चर्यसुखानाम् अनुभवानां वा, भूम्ना बाहुल्येन, गहनैः संभृतैः पदार्थैः सान्द्रा निबिडा च भवति। तां युवयोः राजधानीं प्रधाननगरीं विदुः श्रुतयो मुनयो वेति शेषः। "प्रधाननगरी राज्ञां राजधानीति कथ्यते" इत्यमरशेषः॥ २३॥

हे श्रीरंगेश्वरगेहलक्ष्मि! (श्रीरंगनाथके दिव्यविमानका अलंकारभूते!) शासन करनेमें उग्र अथवा भयंकर, दयाकरनेमें सौम्यरूप ऐसे जिस पुरीके रक्षक हैं, और जो भक्तोंका तथा शरणागतोंका परमपुरुषार्थरूप फल है, युद्धसे जीतनेमें अशक्य होनेसे अयोध्या जिसका नाम है और जो पुरी परमाकाश (परंपद) से भी परे है, अमृत जिसमेंसे झरता है ऐसे आश्चर्यरूप सुखप्रवाहोंसे परिपूर्ण है, ऐसी जो आपकी पुरी श्रीवैकुंठ है तिसको श्रुतियोंने आपकी और आपके पति नारायणकी राजधानी कहा है॥ २३॥

तत्र स्थितमास्थानमनुसन्धत्ते–

अब उस वैकुंठमें लक्ष्मीनारायणके निज निवासस्थानका वर्णन करते हैं–

तस्यां च त्वत्कृपावन्निरवधिजनताविश्रमार्हावकाशं
सङ्कीर्णं दास्यतृष्णाकलितपरिकरैः पुंभिरानन्दनिघ्नैः।
स्नेहादस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यै-
रानन्दैकार्णवं श्रीर्भगवति युवयोराहुरास्थानरत्नम्॥ २४॥

तस्यामिति–भगवति! षाड्गुण्यपरिपूर्णे! हे श्रीः! तस्यां पुरि त्वत्कृपावत् त्वद्दयेव निरवधिजनताविश्रमार्हावकाशं निरवधेः अवधिशून्यायाः असंख्यायाः, जनतायाः जनसमूहस्य, विश्रमार्हः विश्रान्तियोग्यः, अवकाशः अन्तरं यस्मिन् तत्तथोक्तम्। त्वत्कृपायास्सर्वविषयत्वात् तथात्वमविवादं तद्वदिदमपीति भावः। दास्यतृष्णाकलितपरिकरैः दास्ये कैङ्कर्यकरणे तृष्णया स्पृहया कलिताः गृहीताः परिकराः छत्रचामरपतद्ग्रहकलाचिकादयो यैस्तैः आनन्दनिघ्नैः आनन्दविवशैः, पुंभिः मुक्तपुरुषैः सङ्कीर्णं संभृतं स्नेहग्रहात् भगवद्दिव्यमङ्गलविग्रहप्रेम्णः अस्थान-

रक्षाव्यसनिभिः अस्थाने अकाण्डे रक्षायां रक्षणे व्यसनिभिः व्याकुलैः परमपदे भयशङ्कया अनवकाशाद्रक्षाव्यसनस्यास्थानत्वम्। शार्ङ्गचक्रासिमुख्यैः चापसुदर्शनखड्गप्रभृतिभिः पञ्चायुधैः अभयं भयरहितम्। आनन्दैकार्णवम् आनन्दस्यानुकूलज्ञानस्य अर्णवं समुद्रम् अपरिच्छिन्नानन्दावहमित्यर्थः। तथाभूतं युवयोः श्रीश्रीपत्योः आस्थानरत्नं महामणिमण्डपश्रेष्ठमाहुः। वेदान्ता इति शेषः। तस्याश्चेत्यत्र चशब्दस्य आस्थानरत्नश्चाहुरित्युत्तरत्रान्वयः। "प्रजापतेस्सभां वेश्म प्रपद्यन्ते" इति श्रुतिरत्र प्रमाणतयाऽनुसन्धेया ॥ २४ ॥

हे भगवति ! उस वैकुंठमें आपकी दयाकी नाई आपका निज निवासस्थान इतना विस्तृत है कि, जिसमें अवधि रहित जनसमूह स्वच्छंद अवकाश पूर्वक सुखसे विश्राम करसकें और जो स्थान आपकी सेवा (कैंकर्य) करनेकी इच्छासे छत्र चंवर पतद्ग्रह इत्यादिक सामग्रियोंको ग्रहण करनेवाले नित्यमुक्त आनंद मूर्तियोंसे व्याप्त है और भगवान्के दिव्यमंगलविग्रहके प्रेमातिशयसे निर्भय स्थानमें भी रक्षा करनेका व्यसन है जिनोंको ऐसे शार्ङ्गधनुष, चक्र, खड्ग आदि पांच आयुधोंसे जो स्थान निर्भय है और आनंदका समुद्र है, हे श्री ! वेदोंने आप दोनोंका निज विश्राम स्थान मणिमंडप इस प्रकारका कहा है ॥ २४ ॥

तन्मण्डपे शेषसिंहासने विश्वरक्षादीक्षितेन स्वामिना सह सर्वानन्दावहत्वमाह—

उस मणिमंडपमें शेषसिंहासनके ऊपर विराजमान लक्ष्मीनारायणके सहित समस्त आनंदानुभवोंका वर्णन करते हैं—

तत्र स्रक्स्पर्शगन्धं स्फुरदुपरिफणारत्नरोचिर्वितानं
विस्तीर्यानन्तभोगं तदुपरि नयता विश्वमेकाधिपत्यम्।
तैस्तैः कान्तेन शान्तोदितगुणविभवैरहतात्वामसंख्यै-
रन्योन्याद्वैतनिष्ठावनरसगहनान्देवि बध्नासि भोगान् ॥२५॥

तत्रेति—हे देवि ! तत्र महामणिमण्डपे स्रक्स्पर्शगन्धं स्रजः पुष्पमालिकायाः स्पर्शगन्धाविव स्पर्शगन्धौ यस्य तं तथोक्तम्। स्फुरदुपरिफणारत्नरोचिर्वितानं स्फुरतामुपरि फणारत्नानाम् उपरितनमाणिक्यानां रोचींष्येव वितानम् उल्लोचः यस्य तम्। अनन्तभोगम् अनन्तस्य शेषस्य भोगं कायं विस्तीर्य विस्तृतं कृत्वा तदुपरि अनन्तभोगोपरि निविश्येति शेषः। विश्वं विभूतिद्वयम् एकाधिपत्यम्

एकच्छत्राधिपत्यम् । नयता गमयता असंख्यैः संख्यातीतैः तैः अवाङ्मनसगोचरैः शान्तोदितगुणविभवैः शान्तोदितस्य भगवच्छान्तोदितदशायाः स्वैश्वर्यानुभवरूपायाः गुणविभवैः गुणातिशयैः त्वामर्हता त्वदनुरूपेण कान्तेन प्रियेण हरिणा सह अन्योन्याद्वैतनिष्ठाघनरसगहनान् अन्योऽन्यं परस्परम्, अद्वैतनिष्ठया एकीभावेन परस्परगाढानुरागेणेत्यर्थः । घनेन निबिडेन, रसेन आनन्देन, गहनान्निर्भरान् भोगान् अनुभवान् । बध्नासि घटयसि । युवयोः सेवकानां सूरिपरिषदां चेति भावः । "बन्ध बन्धने" इत्यस्माद्धातोश्श्नाप्रत्यये लटस्सिपि बध्नासीति रूपम् ॥ २५ ॥

हे देवि ! उस मणिमंडपमें पुष्पमालाके सदृश स्पर्श और गंध है जिनका तथा ऊपरको स्फुरायमान (चंचल) सहस्र फणही जिनमें चंदउआ हैं और फणोंके रत्नोंकी ज्योति ही जिनमें दीपावलि हैं इस प्रकार विस्तृत शेषशय्याके ऊपर बैठकरके उभयविभूति (लीलाविभूति—त्रिपाद्विभूति) का सापत्न्य रहित एकाधिपत्यको सूचना करते असंख्य और वचन मनके अगोचर शांतोदितगुणवैभवोंसे अपने अनुरूप परमप्रिय पति नारायणके हित परस्पर गाढ अनुरागरूप घनीभूत आनंदका अनुभव करती हो तथा नित्यमुक्तोंको आनंदानुभव कराती हो ॥ २५ ॥

न केवलं पत्युस्त्वमेवानन्दावहा त्वमिव पत्युस्तव च भोग्यभूताः परस्सहस्रं सपत्न्यः सन्तीत्याह—

अब यह दिखाते हैं कि, जैसे आप भगवानको आनंदानुभव कराती हो तैसेही आपका और श्रीहरिका भोग्यभूत हजारहों सपत्नी हैं—

भोग्या वामपि नान्तरीयकतया पुष्पाङ्गरागैस्समं
निर्वृत्तप्रणयातिवाहनविधौ नीताः परिवाहताम् ।
देवि त्वामनु नीलया सह महीदेव्यस्सहस्रं तथा
याभिस्त्वं स्तनबाहुदृष्टिभिरिव स्वाभिः प्रियं श्लाघसे ॥ २६ ॥

भोग्या इति । हे देवि ! वामपि भोग्यभूतयोर्युवयोरपि । पुष्पाङ्गरागैस्समं स्रक्चन्दनादितुल्यम् । अङ्गरागशब्देन अङ्गरचनाहेतुभूतघनसारकुङ्कुमकस्तूर्यादयोऽपि गृह्यन्ते । नान्तरीयकतया स्वभोग्यतोपयोगेन भोग्याः यथा पुष्पाङ्गरागादीनां प्रधानभूतस्वभोग्यतोपयोगेन भोग्यत्वं तथा तासामपीति भावः । निर्वृत्त-

प्रणयातिवाहनविधौ निर्वृत्तस्य परिपूर्णस्य उद्वेलस्येत्यर्थः । प्रणयस्य प्रेमरसस्य, अतिवाहनविधौ अतिप्रवाहणे परीवाहतां निर्गमप्रवाहतां नीताः प्रापिताः । श्रीश्रीपत्योरुन्मस्तकः प्रेमरसस्सपत्नीमुखेन प्रवहतीति भावः । यथा तटाकः परिपूर्णस्सन्निर्गमप्रवाहं विना न निर्वहति तथा श्रीश्रीशयोरत्युत्कटप्रेमरसो भूनीलादिसपत्नीमुखेन प्रवहणं विना न निर्वहतीति हृदयम् । नीलया नीलादेव्या सह मही भूदेवी त्वामनु त्वद्व्याप्यतयेत्यर्थः । नीळया सहेति नीळादेव्या भूम्यपेक्षया व्याप्यत्वं स्फुटम् "सहयुक्तेऽप्रधाने" इत्यनुशासनात् । तथा भूनीले इव त्वामनुसृत्य सहस्रं देव्यस्सन्तीति शेषः । त्वं याभिः देवीभिः स्वाभिः स्वकाभिः स्तनबाहुदृष्टिभिरिव स्वावयवैरिव । प्रियं प्रेयांसं श्लाघसे सन्तोषयसि । "श्लाघृकत्थने" इत्यस्माद्धातोर्लडात्मनेपदि मध्यमपुरुषैकवचनम् । स्तनबाहुदृष्टिभिरित्यत्र महाविभाषया द्वन्द्वैकवद्भावविकल्पः । न केवलं लक्ष्म्यास्ताभिस्समं सापत्न्यकलहाभावः परन्तु भगवतस्ताभिस्सह संश्लेषे स्वावयवसंश्लेष इव तस्या महती प्रीतिर्वर्धत इति भावः ॥ २६ ॥

हे देवि ! उस वैकुंठमें माला चंदनके तुल्य विनियोगके योग्य आप दोनोंका भोग्यरूप और परिपूर्ण प्रेम रसके प्रवाहसे प्रवाहताको प्राप्त, ऐसी नीला तथा भूमी देविके सहित हजारहों देवी आपके स्तन बाहु दृष्टिकी नाई अवयव तुल्य हैं जिन अपनी अवयभूत देवियोंके सहित आप अपने प्राणवल्लभ हरिको संतोष कराती हो । इससे यह फलितभया कि, लक्ष्मीजीको अन्य प्रियाओंके साहित केवल कलहका अभावही मात्र नहीं किंतु वे अवयवरूप होकर हरिकी सेवा करती हैं ॥ २६ ॥

इत्थं लक्ष्म्यास्सपत्नीसहस्रमुक्त्वा परिचारकवर्गमाह–

इस प्रकार लक्ष्मीकी हजारहों सपत्नियोंको कहकर अब सेवाकरनेवालोंको कहते हैं–

ते साध्यास्सन्ति देवा जननि ! गुणवपुर्वेषवृत्तस्वरूपै-
र्भोगैर्वा निर्विशेषास्सवयस इव ये नित्यनिर्दोषगन्धाः ।
हे श्रीः श्रीरङ्गभर्तुस्तव च पदपरीचारवृत्त्यै सदापि
प्रेमप्रद्राणभावाविलहृदयहठात्कारकैङ्कर्यभोगाः ॥ २७ ॥

त इति । हे जननि श्रीः ! साध्याः साध्यनामकाः देवाः द्योतमानाः मोदमाना वा नित्यनिर्दोषगन्धाः नित्य कालत्रयेऽपि निर्दोषगन्धाः निर्गतावद्यलेशाः । "लेशेऽपि गन्धः" इत्यमरः । अस्पृष्टसंसारगन्धा इत्यर्थः। गुणवपुर्वेषवृत्तस्वरूपैः गुणैः अपहतपाप्मत्वादिभिः ज्ञानशक्त्यादिभिश्च वपुर्भिः विग्रहैः वेषैः शङ्खचक्राद्यलङ्कारैः वृत्तैः निरङ्कुशव्यापारैः, स्वरूपैः ज्ञानानन्दामलात्मस्वरूपैः भोगैः सविभूतिकभगवत्कल्याणगुणानुभवैर्वा । वाशब्दश्चार्थः । भोगैश्चेत्यर्थः । निर्विशेषाः विशेषरहिताः । तुल्या इत्यर्थः । युवाभ्यां परस्परञ्चेति शेषः । अत एव सवयस इव समानवयस्का इव सखाय इव वा । ये सन्ति ते सूरयः श्रीरङ्गभर्तुस्तव च पदपरीचारवृत्त्यै श्रीपादकैङ्कर्यकरणाय सदापि सर्वदेशसर्वकालसर्वावस्थास्वपि प्रेमप्रद्राणभावाविलहृदयहठात्कारकैङ्कर्यभोगाः प्रेम्णा प्रीत्या प्रद्राणेन द्रवीभूतेन भावेन अभिप्रायेण अवस्थाविशेषेण वा अविलेन कलिलेन हृदयेन मनसा हठात्कारो झटित्याचरणं यस्य तत्तथोक्तम् । तथाभूतं कैङ्कर्यं परिचरणमेव भोगो भृतिः सुखं वा येषान्ते तथोक्ताः । तथाभूता भवन्तीति शेषः। "भोगस्सुखे स्त्र्यादिभृतौ" इत्यमरः । यद्वा ये साध्याः साध्यनामकाः इत्यादिपूर्वविशेषणविशिष्टाः प्रेमप्रद्राणभावाविलहृदयहठात्कारकैङ्कर्यभोगास्ते सूरयः श्रीरङ्गभर्तुस्तव च पदपरीचारवृत्त्यै सन्तीत्यन्वयः ॥ २७ ॥

हे जननि ! वे साध्यनामवाले देव हैं जिनका कभी प्रकृतिका संबंधही नहीं भया और अपहतपाप्मत्वादिक गुण, चतुर्भुजतादि विग्रह, शंखचक्रादि अलंकार सहित वेष, निरंकुशव्यापारादि वृत्त, ज्ञानानंदादि स्वरूप तथा भगवत् अनुभवरूप भोगोंकरके वे सब तुल्य हैं और सबको एक प्रकारकी अवस्था और परस्परमें मैत्री है । हे श्रीः ! इस प्रकारके जो नित्य मुक्त हैं वे आपकी तथा श्रीरंगनाथकी परिचर्या (सेवा) के लिये सर्वदा द्रवीभूत प्रेमसे आकुल हृदय होकर शीघ्र कैंकर्य करनाही जिनका भोग्य है ऐसे नित्य, मुक्त आपके परिचारक (किंकर) हैं ॥ २७ ॥

अथ लक्ष्म्या भगवत्स्वरूपनिरूपकधर्मतामाह—

अब इसके अनंतर यह कहते हैं कि, लक्ष्मीजीके भगवान्का स्वरूप निरूपक धर्मत्वका कहते हैं—

स्वरूपं स्वातन्त्र्यं भगवत इदं चन्द्रवदने !
त्वदाश्लेषोत्कर्षाद्भवति खलु निष्कर्षसमये ।

त्वमासीर्मातः श्रीः कमितुरिदमित्थं त्वविभव-
स्तदन्तर्भावात्त्वां न पृथगभिधत्ते श्रुतिरपि ॥ २८ ॥

स्वरूपमिति—हे चन्द्रवदने! आश्रितानन्दनमुखि ! मातः ! श्रीः ! निष्कर्ष-समये निर्णयवेलायां भगवतः श्रीमन्नारायणस्य इदं स्वरूपं दिव्यात्मस्वरूपं स्वातन्त्र्यं निरङ्कुशस्वतन्त्रत्वञ्च त्वदाश्लेषोत्कर्षात् त्वन्नित्ययोगातिशयात् भवति खलु । तत्र हेतुमाह—त्वमासीरिति । कमितुः प्रेयसः त्वमिदमित्थं त्वविभवः आसीः अयमीश्वर इतीदन्त्वविभवः ईदृश ईश्वर इतीत्थंत्वविभवः उभयमपि त्वमेवाभवः । सन्तस्त्वां भगवति दृष्ट्वा त्वदाश्रयमीश्वरं निश्चिन्वन्ति । त्वत्पतित्वमीश्वरलक्षणं जानन्ति चेति भावः । श्रुतिस्त्वामपि तदन्तर्भावात् भगवत्स्वरूपनिरूपककोटा-वन्तर्भावात् । पृथक् भगवतः पृथक्कृत्य । नाभिधत्ते न वदति । अभिपूर्वात् "डुधाञ्—धारणपोषणयोः" इत्यस्माद्धातोर्जौहोत्यादिकाच्छपः श्लौ "श्लौ" इति द्वित्वे अभ्यासह्रस्वत्वे । "श्नाभ्यस्तयोरातः" इत्यालोपे " दधस्तथोश्च" इति भष्भावे अभिधत्त इतिरूपम् ॥ २८ ॥

हे चंद्रवदने ! निर्णय करनेके समयमें यही कहा जा सकता है कि, सर्व-स्वतंत्र जो भगवान्का स्वरूप है सो आपहीके निरंतर संश्लेषसे है क्योंकि सर्वेश्वरमें इदंत्व इत्थंत्व वैभव आपहीका है, ये ईश्वरहैं—यह इदंत्वं वैभवहै, इस प्रकारके ईश्वर हैं—यह इत्थंत्व वैभवहै, अर्थात् भगवान्के बीचमें आपको देखकर आपका आश्रय जो वस्तु है सो ईश्वर है ऐसा जानतेहैं और आपके पति होनेसे इस प्रकारके लक्षणवाले ईश्वर हैं ऐसा तत्त्ववेत्ता लोग कहते हैं इस कारण दोनों प्रकारसे आपही हो तथा आपकोभी भगवान्के स्वरूप निरूपक कोटिके अंतर्भाव होनेसे श्रुति पृथक् स्वतंत्र नहीं कहती है ॥ २८ ॥

"मङ्गलं भगवान्विष्णुर्मङ्गलं मधुसूदनः । मङ्गलं पुण्डरीकाक्षो मङ्गलं गरुड-ध्वजः ॥ पवित्राणां पवित्रं यो मङ्गलानाञ्च मङ्गलम् ॥" इति भगवति प्रयुज्यमानं मङ्गलपदं श्रीसंबन्धायत्तमित्याह—

' मङ्गलं भगवान्विष्णुः ' ' पवित्राणां पवित्रोऽसौ ' अर्थात् सब मंगलोंके मंगल तथा सब पवित्रोंमें पवित्र भगवान् विष्णु हैं इस वचनसे भगवान्के विषय मंगल पदका प्रयोग लक्ष्मीके संबंधाधीन है सो कहते हैं—

तव स्पर्शादीशं स्पृशति कमले मङ्गलपदं
तवेदं नोपाधेरुपनिपतितं श्रीरसि यतः ।

प्रसूनं पुष्यन्तीमपि परिमलर्द्धिं जिगदिषु-
र्न चैवंत्वा देवं स्वदत इति कश्चित्कवयते ॥ २९ ॥

तवेति—हे कमले ! ईशं स्वामिनम् । तव स्पर्शात् त्वत्संबन्धात् मङ्गलपदं मङ्गलशब्दः स्पृशति बोधयति इदम् एतन्मङ्गलपदम् उपाधेः प्रयोजकान्तरात् तव नो निपतितं न त्वद्वाचकत्वेन संबद्धम् किं तु स्वत एव । तत्र हेतुमाह—यतः श्रीरसीति । यतो हेतोस्त्वं श्रीर्मङ्गलमसि । तत्र दृष्टान्तमाह—प्रसूनमिति पुष्पं प्रसूनं पुष्यन्तीम् अतिशयितं कुर्वन्तीम् परिमलर्द्धिमपि गन्धसंपदमपि जिगदिषुः स्वाद्यां गदितुमिच्छुः एवंत्वात् एतादृशगुणयोगात् एवं स्वदते इत्थं हृद्या भवति इति कश्चित् कोऽपि पुमान् न च कवयते न कथयति । हि चोह्यर्थः । पुष्पातिशयनिरूपणे परिमलापेक्षेव परिमलातिशयानिरूपणे गुणान्तरापेक्षा यथा नास्ति तथा भगवन्मङ्गलत्वे श्रीसंबन्धो नियामकः न तु तस्यास्तत्त्वे नियामकान्तरापेक्षेति भावः ॥ २९ ॥

हे कमले ! ईश्वरमें मंगलत्व आपके संबंधसे है और आपके विषय यह मंगलत्व उपाधि (दूसरेद्वारा) से नहीं है किंतु स्वतःसिद्ध है क्योंकि आप श्री है अर्थात् स्वतः मंगलरूप हैं इसमें दृष्टांत देते हैं कि, पुष्पके अतिशयको बढानेवाली सुगंधि है और सुगंधिको ऐसा कोई नहीं कह सकता कि इस गुणके संबंधसे यह सुगंधि मनोहर है अर्थात् जिस प्रकार पुष्पके अतिशय निरूपणमें सुगंधिकी अपेक्षा है तैसे सुगंधिके अतिशय निरूपणमें अन्यगुणोंकी अपेक्षा नहीं है इसी प्रकार भगवान्में मंगलत्वका कारण श्रीसंबंध है और श्रीजीके मंगलत्वमें अन्य गुणोंकी अपेक्षा नहीं है ॥ २९ ॥

सर्वेश्वरस्य लोकपालानां च लक्ष्मीकटाक्षलब्धविभवत्वमुक्त्वा सर्वेश्वरं लोकपालांश्च प्रतिपादयन्वेदस्त्वामेव प्रतिपादयतीत्याह—

सर्वेश्वरका और लोकपालोंका वैभव श्रीजीके कटाक्षाधीन है ऐसा वेद प्रतिपादन करता है सो कहते हैं—

अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभू-
दमी यत्र द्वित्रास्स च शतमखादिस्तदधरात् ।
अतः श्रीराम्नायस्तदुभयमुशंस्त्वां प्रणिजगौ
प्रशस्तिस्सा राज्ञो यदपि च पुरीकोशकथनम् ॥ ३० ॥

अपाङ्गा इति। हे श्रीः! तव भूयांसः बहुसङ्ख्याः अपाङ्गाः कटाक्षाः यदुपरि यस्य वस्तुन उपरि प्रसृता इति शेषः। तद्वस्तु परं ब्रह्माभूत्। तव भूयः कटाक्षविषयीभूतं वस्तु परब्रह्मत्वमगमदित्यर्थः। अमी अपाङ्गाः यत्र वस्तुनि द्वित्रा द्वौ वा त्रयो वा मानं येषां ते द्वित्राः ते प्रसृताः स च तदधरात् ततः परब्रह्मणः अधरात् अर्वाचीनः शतमखादिरभूत्। इदमुपलक्षणं विधिशिवयोरपि तदवरत्वं बोध्यम् "नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते" "क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां तवाङ्गे संभूतौ तस्मात्केशवनामवान्"॥ इति ब्रह्मरुद्रयोरपि भगवत उत्पन्नतया श्रुतिस्मृत्यवगतत्वात्। स चेति। शतमखाद्यपेक्षया पुँल्लिङ्गनिर्देशः। अतस्त्वत्कटाक्षलब्धविभवत्वात्तदुभयं परब्रह्मविधिशिवशतमखादिरूपम्। उशन् कामयमानः वदन्नित्यर्थः। आम्नायो वेदः। त्वां प्रणिजगौ प्रव्यक्तं गदितवान्। प्रणिपूर्वात् "गैशब्दे" इत्यस्माद्धातोर्लिट्परस्मैपदप्रथमपुरुषैकवचनम्। तथाहि पुरीकोशकथनं पुर्या राजधान्याः कोशस्य धनसञ्चयादेश्च कथनम् अतिशयेन वर्णनं क्रियत इति यत् जनैरिति शेषः। सा राज्ञः तत्परिपालकस्य प्रभोः। प्रशस्तिः प्रसिद्धिः अत्र पुरीकोशकथनं राज्ञः प्रशस्तिरिति सामान्यनिर्देशेन परब्रह्मादिपराम्नायकृतलक्ष्मीप्रशस्तिकथनविशेषस्य समर्थनात्सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासालङ्कारः॥ ३०॥

हे श्रीः! जिस वस्तुके ऊपर आपका बहुत कटाक्ष पडा वह वस्तु परब्रह्म संज्ञक भया और जिसके ऊपर दो तीन कटाक्ष पडा वह वस्तु परब्रह्मसे नीचे नीचे इंद्र विधि शिवादि संज्ञक होता भया। इसी कारण वेदोंने परब्रह्म तथा विधि शिव शतमखादिकोंकी स्थितिको वर्णन करते आपको उच्चस्वरसे कथन किया इस प्रकारका कथन ठीकहीं तो है—क्योंकि, राज्य और राजधानी तथा कोश (खजाना) के कथनसे राजाहीकी प्रसिद्धि होती है॥ ३०॥

भगवत्स्वरूपं स्वातन्त्र्यं त्वदाश्लेषादिति प्रागुक्तं सिंहावलोकनेन निरीक्ष्य तथात्वे पराधीनत्वमन्याहितातिशयित्वं विगुणत्वञ्च प्रसज्येदित्याशङ्क्य हेतुविशेषेण दृष्टान्तबलेन च परिहरति—

इसके पूर्व यह कहआये कि, आपके संश्लेषसे ईश्वरका स्वतंत्र स्वरूप है, ऐसे कहनेसे ईश्वरको पराधीनत्व, विगुणत्व, दूसरेके आधीन अति शयत्व कदाचित् सिद्धहो इस शंकाको विशेष हेतुवाले दृष्टांतोंसे दूर कहते हैं—

स्वतः श्रीस्त्वं विष्णोः स्वमसि तत एवैष भगवां-
स्त्वदायत्तर्द्धित्वेऽप्यभवदपराधीनविभवः।
स्वया दीप्त्या रत्नं भवदपि महार्घं न विगुणं
न कुण्ठस्वातन्त्र्यं भवति च न चान्याहितगुणम् ॥ ३१ ॥

स्वत इति। हे श्रीः! त्वं विष्णोः स्वतः स्वभावात् निरुपाधिकात्मस्वरूपस्वभावादित्यर्थः। स्वमसि शेषभूतासि "स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणिस्थितम्। आत्मदास्यं हरेस्स्वाम्यं स्वभावञ्च सदा स्मर॥" इत्याद्यनेकप्रमाणप्रसिद्धेः। तत एव स्वत्वादेव एष भगवान् श्रीरङ्गराजः त्वदायत्तर्द्धित्वेऽपि अपराधीनविभवोऽभवत्। तथाहि—रत्नं माणिक्यं स्वया दीप्त्या स्वकान्त्या महार्घं निरवधिकमूल्यं भवदपि विगुणं गुणहीनं न कुण्ठस्वातन्त्र्यं प्रतिहतस्वोत्कर्षञ्च न। अन्याहितगुणं पराधीनातिशयञ्च न भवति। तद्वत्त्वत्प्रियोऽपि त्वदधीनसंपत्त्वेऽपि न विगुणो न कुण्ठस्वातन्त्र्यो नान्याहितातिशयश्च भवतीति भावः॥ ३१ ॥

हे श्रीः! अनेक प्रमाणोंसे भगवान् विष्णुका तुम स्वतः (स्वाभाविक) स्ववस्तु (शेषभूत) हो इसीकारण यह भगवान् श्रीरंगराज तुम्हारे आधीन वैभववाले होकरभी अपराधीन हैं। जैसे माणिक्य अपनी स्वाभाविक कांतिसे ही महार्घ (अमूल्य) होता है तौभी विगुणत्वादि दोष उसमें नहीं लगसकते। अर्थात् उस मणिको ऐसा कोई नहीं कह सकता कि यह मणि गुणरहित, नष्टमहत्त्व, दूसरेके आधीन अतिशयवाला है तैसही आपके परमप्रेष्ठ भगवान् आपके आधीन संपत्वाले हैं तौभी विगुणत्वादि दोषरहित हैं॥ ३१ ॥

इत्थं लक्ष्मीस्वरूपमनुसन्धाय स्वरूपाश्रितान् दिव्यमङ्गलविग्रहाश्रितांश्च कल्याणगुणान्विवक्षुः प्रथमं श्रीश्रीशयोस्साधारणगुणाननुसन्धत्ते—

इस प्रकार श्रीजीके स्वरूपको अनुसंधान करिके स्वरूपके आश्रित दिव्यमंगलविग्रह तथा कल्याणगुणोंका कथन करनेकी इच्छासे पहिले लक्ष्मी और नारायणके धारणगुणोंको अनुसंधान करते हैं—

प्रशकनबलज्योतिर्ज्ञानैश्वरीविजयप्रथा-
प्रणतवरणप्रेमक्षेमङ्करत्वपुरस्सराः।
अपि परिमलः कान्तिर्लावण्यमर्चिरितीन्दिरे
तव भगवतश्चैते साधारणा गुणराशयः॥ ३२ ॥

१ लावण्यमर्चिरितीन्दिरे इति च पाठः।

प्रशकनेति । हे इन्दिरे ! परमैश्वर्यप्रदे ! श्रीः ! प्रशकनं प्रकृष्टा शक्तिः, बलं सर्वजगद्धरणसामर्थ्यं ज्योतिस्तेजः, ज्ञानं सर्वदा सर्ववस्तुसाक्षात्कारः, ऐश्वरी ईश्वरत्वं विजयप्रथा जयशीलत्वप्रशस्तिः, प्रणतवरणम् आश्रितवशीकारः, प्रेम आश्रितविषयप्रीतिः, क्षेमङ्करत्वम् आश्रितेष्टप्रापकत्वं तदनिष्टनिवर्तकत्वञ्च पुरस्सराः प्रधानानि येषां ते तथोक्ताः । एते दिव्यात्मस्वरूपगुणाः । अथ दिव्यमङ्गलविग्रहगुणानाह—अपीति । अपि अपिचेत्यर्थः । न केवलमात्मगुणा एव साधारणाः विग्रहगुणा अपि चेत्यपिशब्दार्थः । परिमलः सौगन्ध्यम्, कान्तिः सौन्दर्यं सः चावयवशोभा लावण्यम् समुदायशोभा अर्चिः औज्ज्वल्यम् परप्रकाशकत्वमिति यावत् । इत्येते द्विविधा अपि स्वरूपविग्रहाश्रितगुणराशयो गुणसमूहाः तव भगवतश्च साधारणास्समाना इत्यर्थः । अत्र भगवतो विजयप्रथा श्रीरामायणे “ शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः ” इति रावणवचनादभिव्यक्ता । सीतायास्तु वासिष्ठरामायणे शतकन्धरसंहारे विजयप्रथा सुव्यक्ता । भगवतः क्षेमङ्करत्वमुभयविधमपि साक्षादेव । लक्ष्म्यास्त्विष्टप्रापणं साक्षात्परंपरया वापि संभवति । अनिष्टनिवर्तकत्वं तु भगवद्द्वारेति बोध्यम् ॥ ३२ ॥

हे इंदिरे ! उत्तम शक्ति, सामर्थ्य, तेज, ज्ञान, ईश्वरत्व, विजयत्वकी प्रसिद्धि, आश्रितवशीकरण, प्रेम, आश्रितोंके लिये इष्टप्राप्ति—अनिष्ट निवृत्ति, इत्यादिक ये सब आपके स्वरूप संबंधि गुण हैं और सौगंध्य, कांति, सौंदर्य (अवयव शोभा) लावण्य (समुदायशोभा) औज्वल्यादिक विग्रह गुण हैं । स्वरूप और विग्रहके आश्रित ये दोनों प्रकारके गुणसमूह आपके और भगवान्के साधारण हैं ॥ ३२ ॥

पुनस्साधारणगुणाननुसंधत्ते—

फिर साधारणगुणोंका अनुसंधान करते हैं—

> अन्येऽपि यौवनमुखा युवयोस्समानाः
> श्रीरङ्गमङ्गलविजृम्भणवैजयन्ति ।
> तस्मिंस्तव त्वयि च तस्य परस्परेण
> संस्तीर्य दर्पण इव प्रचुरं स्वदन्ते ॥ ३३ ॥

अन्येऽपीति । हे श्रीरङ्गमङ्गलविजृम्भणवैजयन्ति ! श्रीरङ्गोत्सवप्रकाशनोद्धतकेतो ! श्रीरङ्गोत्सववृद्धिकरीत्यर्थः । अन्ये उक्तगुणव्यतिरिक्ता यौवनमुखाः

यौवनादयः मुखशब्देन सौकुमार्यादयो गृह्यन्ते । युवयोः भगवतस्तव च समानाः साधारणास्सन्तः तव गुणास्तस्मिन् तस्य गुणास्त्वयि च दर्पण इव संस्तीर्य अभिव्याप्य । परस्परेण अन्योऽन्यं प्रचुरं प्रकामं स्वदन्ते रस्या भवन्ति "स्वद-आस्वादने" इत्यस्माद्धातोर्लेडात्मनेपदप्रथमपुरुषबहुवचनम् । भगवान् लक्ष्म्यां प्रशाकनबलादीनवलोक्य स्वकीया एवैते गुणा इत्यानन्दमनुभवति । एवं लक्ष्मी-रपि भगवति तानुपलक्ष्य स्वकीया एवैत इति संमोदं भजत इति वक्त्रभिप्रायः ३३

हे श्रीरंगमंगलविजृंभण वैजयंति ! उक्त गुणोंसे पृथक् यौवनादिक सौकुमार्यादि गुणगण आपके तथा हरिके साधारण हैं आपका गुण हरिमें हरिका गुण आपमें है इसमें दर्पणका दृष्टांत देते हैं कि, जैसे परस्पर दर्पणमें प्रतिबिंब रसदायी होता है वेसेही भगवान् लक्ष्मीजीमें ज्ञातशक्यादिगुणोंको देखकर अमना गुण मानते हैं और लक्ष्मीजी भगवानमें ज्ञानशक्त्यादिकोंको देखकर अपना जानकर आनंदानुभव करती है यह अभिप्राय है ॥ ३३ ॥

ननूभयोस्स्वरूपरूपगुणसाधारण्ये सेवकानां श्रीश्रीशापृथगनुभवः कथं घटत इत्यत्राह—

अब यह कहते हैं कि, जो दोनोंका स्वरूप रूप गुण बरावर है तो लक्ष्मी और हरिका अनुभव सेवकोंको कैसे बन सकता है !

युवत्वादौ तुल्येऽप्यपरवशताशत्रुशमन-
स्थिरत्वादीन्कृत्वा भगवति गुणान्पुंस्त्वसुलभान् ।
त्वयि स्त्रीत्वैकान्तान्म्रदिमपतिपारार्थ्यकरुणा-
क्षमादीन्वा भोक्तुं भवति युवयोरात्मनि भिदा ॥ ३४ ॥

युवत्वादाविति । हे श्रीः ! युवत्वादौ यौवनादौ तुल्येऽपि युवयोरिति शेषः । भगवति हरौ । पुंस्त्वसुलभान् पुरुषैकनिष्ठान् अपरवशताशत्रुशमनस्थिरत्वादीन् अपरवशता स्वातन्त्र्यम्, शत्रुशमनं विरोधिनिवर्त्तकत्वम्, स्थिरत्वम् अप्रकंप्यत्वम् आदिर्येषां तान्गुणान् कृत्वा भेदकाननुसंधाय त्वयि भवत्यां स्त्रीत्वैकान्तान् स्त्रीस्वभावान्तरङ्गान् । म्रदिमपतिपारार्थ्यकरुणाक्षमादीन्वा म्रदिमा मृदुहृदयत्वम्, पतिपारार्थ्यं भर्तृपारतन्त्र्यम्, करुणा परदुःखासहिष्णुत्वम्, क्षमा अपराधसहत्वम् आदिर्येषां तान् । वाशब्दश्चार्थः । क्षमादींश्चेत्यर्थः । कृत्वा भेद-

काननुसन्धाय भोक्तुम् अनुभवितुं युवयोरात्मनि स्वरूपे विग्रहे च भिदा भवति भेदस्सिद्ध्यति । अनुभवितॄणामिति शेषः । यद्यपि म्रदिमकरुणाक्षमा भगवतोऽपि समानाः तथापि स्वातन्त्र्यासंभवहितास्ता इह विवक्षिताः । भगवतो म्रदिमाद्यास्तु न तथाविधा इति भावः ॥ ३४ ॥

हे श्रीः ! यौवनादि गुण आप दोनोंमें विषय तुल्य हैं तौभी पुरुषत्वके अनुरूप स्वातंत्र्य, शत्रुनिवर्त्तकत्व, अप्रकंप्यत्वादिक गुण हरिमें है। और आपमें स्त्रीत्वके अनुरूप मृदुहृदय, पतिपारतंत्र्य, कारुण्य (दूसरेके दुःखोंको न सहना) क्षमा इत्यादिक गुण आपमें हैं इस प्रकार आपमें हरिमें गुणभेदोंको अनुसंधान करिके तत्त्ववेत्ता लोग भेद सिद्ध करते हैं ॥ ३४ ॥

श्रीश्रीपत्योस्स्वरूपभेदकगुणाननुसन्धाय रूपभेदकगुणाननुसंधत्ते—

श्रीजीके तथा हरिके स्वरूप भेदक गुणोंको अनुसंधान करिके अब रूपभेदक गुणोंको अनुसंधान करते हैं—

घनकनकद्युती युवदशामपि मुग्धदशां
युवतरुणत्वयोरुचितमाभरणादि परम् ।
ध्रुवमसमानदेशविनिवेशि विभज्य हरौ
त्वयि च कुशेशयोदरविहारिणि निर्विशसि ॥ ३५ ॥

घनेति । कुशे उदके शेते इति कुशेशयं पद्मम् "जीवनीयं कुशं विषम्" इत्यमरः । तस्यादरे गर्भे विहरतीति कुशेशयोदरविहारिणि ! कमलनिलये । घनकनकद्युती घनस्य नीलमेघस्य कनकस्य सुवर्णस्य द्युती इव द्युती युवदशां युवत्वम । मुग्धदशां तारुण्यमपि । युवतरुणत्वयोः युवत्वतारुण्ययोः उचितं योग्यं परम् उत्कृष्टं परस्परविलक्षणं वा अत एवासमानदेशविनिवेशि असमानदेशे परस्परभिन्नदेशे धर्मिणि, विनिवेशः संवेशनम् यस्य तत्तथोक्तम् । आभरणादि भूषणादि, आदिशब्देन श्मश्रुपीताम्बरोर्ध्वपुण्ड्रयज्ञोपवीतादि स्तनवसनाञ्जनहरिद्राकाश्मीरमकरिकापत्रादि च गृह्यते, हरौ त्वयि च विभज्य विभाजकं कृत्वा । निर्विशसि अनुभवसि, हरिं त्वाञ्चेति शेषः । ध्रुवम् एतत्सत्यम् । एवं विभाजकधर्माननुसन्धाने युवयोर्भेदग्रहो युवयोरेव न भवेदिति भावः । निरित्युपसर्गात् "विश प्रवेशने" इत्यस्माद्धातोर्लण्मध्यमपुरुषैकवचने निर्विशसीति रूपम् ॥ ३५ ॥

हे कुशेशयोदर विहारिणि ! (कमल निलये) मेघ और स्वर्णकी कांति, युवा अवस्था और तरुण अवस्था, तथा युवा और तरुण अवस्थाके योग्य भिन्न भिन्न स्थानोंमें संलग्न भूषणादिकोंको आप अपने और हरिके विग्रहमें अनुभव करती हो । अर्थात् हरिके तथा लक्ष्मीजीके रूपमें इस प्रकारका भेद है, हरिकी मेघकी नाई कांति, लक्ष्मीजीकी स्वर्णकी नाई कांति, हरिकी युवा अवस्था, श्रीजीकी तरुण अवस्था, और युवा अवस्थाके योग्य दाढी मूछोंका उठान, पीतांबर ऊर्ध्वपुंड्र, यज्ञोपवीत आदि चिह्न हरिके हैं । तथा तरुण अवस्थाके अनुरूप स्तन, वस्त्र, अंजन, हरिद्रा, काश्मीर (ओढनी) मकरिका (स्तनोंपर चित्राम) आदि ये सब चिह्न श्रीजीके हैं । इन्हीं चिह्नोंसे अपने और हरिके रूप पृथक्त्व करिके आप अनुभव करती हौ ॥ ३५ ॥

क्षीराब्धिसारसमष्टितया लक्ष्मीविग्रहं वर्णयित्वा कल्पलतादेस्तदृजीषतामुत्प्रेक्ष्य तथा वर्णनं पयोधेराविर्भूतस्य अप्राकृतस्य लक्ष्मीदिव्यमङ्गलविग्रहस्य न युक्तमित्याह—

श्रीजीका दिव्यविग्रह क्षीराब्धिका सार है कल्पलतादिक लक्ष्मीजीके विग्रहका असार है क्या ? ऐसा उत्प्रेक्षा करिके कल्पलतादिकोंको कृत्रिमत्व होनेसे इस प्रकारका कथन भी नहीं बनता है सो कहते हैं—

अङ्गं ते मृदुशीतमुग्धमधुरोदारैर्गुणैर्गुम्फतः
क्षीराब्धेः किमृजीषतामुपगता मन्ये महार्घास्ततः ।
इन्दुः कल्पलता सुधामधुमुखा इत्याविलां वर्णनां
श्रीरङ्गेश्वरि ! शान्तकृत्रिमकथं दिव्यं वपुर्नार्हति ॥ ३६ ॥

अङ्गमिति । हे श्रीरङ्गेश्वरि ! ते तव अङ्गं वपुः अङ्गशब्देनावयववाचिना तत्समुदायरूपं वपुर्लक्ष्यते । मृदुशीतमुग्धमधुरोदारैः मृदुत्वशीतत्वमुग्धत्वमधुरत्वोदारत्वैः, भावप्रधानोऽयं निर्देशः । गुणैर्विग्रहगुणैः सारभूतैरिति शेषः । गुम्फतो ग्रथयतः, क्षीराब्धेः त्वत्पितुः, इन्दुः चन्द्रः, कल्पलतासुधामधुमुखाः कल्पलतासुधे प्रसिद्धे, मधु सुरा, कल्पलतासुधामधूनि मुखमादिर्येषां ते तथोक्ताः । ते ऋजीषतां असारताम् उपगताः किमुत्प्रेक्षा । किंशब्दः संभावनायाम् । ततस्त्वदवयवऋजीषत्वान्महार्घा अमूल्याः भवन्तीति शेषः । मन्य इत्युत्प्रेक्षाव्यञ्जनम् । इति पूर्वोक्तप्रकारेण आविलां कलुषां—वर्णनाम् उत्प्रेक्षां प्रति शान्तकृत्रिम

कथम् अपगतकृत्रिमप्रशंसम्, दिव्यम् अप्राकृतम्, वपुः विग्रहः नार्हति नोचितं भवति। अकृत्रिमस्य लक्ष्मीविग्रहस्य कृत्रिमवस्तुसारत्वोत्प्रेक्षणमयुक्तमिति भावः ३६

हे श्रीरंगेश्वरि ! मृदुत्व, शीतलत्व, मुग्धत्व (सुंदरत्व) मधुरत्व, उदारत्व आदि साररूप गुणोंसे आपके अंगको ग्रंथित (अलंकृत) करनेवाले आपके पिता समुद्रका चंद्र, कल्पवृक्ष, अमृत, सुरा आदि असारांश हैं क्या ? क्योंकि वे अमूल्य हैं इससे ज्ञात होता है कि आपके अवयवके असारत्व संबंधसे ही उनमें अमूल्यत्व है ऐसा हम मानते हैं। परंतु इस प्रकारका अनुचित वर्णन उत्प्रेक्षकाभी अयुक्त है क्योंकि श्रीजीके अप्राकृत दिव्यमंगल विग्रहमें कृत्रिम वस्तुकी सारत्व उत्प्रेक्षा नहीं बन सकती ॥ ३६ ॥

पुनर्विग्रहमेव वागगोचरं वर्णयति—

फिर श्रीजीका विग्रह वचनके अगोचर है सो कहते हैं—

प्रणमदनुविधित्सा वासनानम्रमग्रे
प्रणयिपरिचिचीषाकुञ्चितं पार्श्वकेन ।
कनकनिकषचञ्चच्चम्पकस्रक्समान-
प्रवरमिदमुदारं वर्ष्म वाचामभूमिः ॥ ३७ ॥

प्रणमदिति । अत्र श्रीस्तवेति पदद्वयमध्याहार्यम् । हे श्रीः ! अग्रे उत्तमाङ्गे प्रणमदनुविधित्सावासनानम्रं प्रणमतां सेवकानाम् अनुविधित्साया अनुविधानेच्छायाः, वासनया परिचयेन, नम्रम् ईषद्विनतम् । पार्श्वकेन पार्श्वभागेन प्रणयिपरिचिचीषाकुञ्चितं प्रणयिनः प्रियस्य, परिचिचीषया परिचर्येच्छया, कुञ्चितं भयभक्तिभ्यां हेतुभ्यां संकुचितं कनकनिकषचञ्चच्चम्पकस्रक्समानप्रवरं कनकनिकषस्य छायायास्सुवर्णरेखायाश्चञ्चत्याः स्फुरन्त्याः चम्पकस्रजः चम्पकमालिकायाश्च, समानस्तुल्यः, प्रवरो गोत्रं यस्य तत्तथोक्तं तयोः सदृशमित्यर्थः । अनेनौज्ज्वल्यसौगन्ध्ये सूचिते । उदारम् ऊर्जितं सर्वाभीष्टप्रदं वा इदम् एतत् अप्राकृतं तव वर्ष्म वपुः वाचामभूमिः अपदं वागगोचरमित्यर्थः ॥ ३७ ॥

हे श्रीः ! प्रणाम करनेवाले जनोंके प्रति नमस्कार करनेकी वासनासे आगेमें झुकाभया नम्र है मस्तक जिसका, तथा अपने परमप्रिय नारायणकी परिचर्याकी इच्छासे संकुचित है पार्श्व जिसका और स्फुरायमान (चंचल) स्वर्णकी रेखा तथा चम्पकपुष्पमालाके तुल्य गोत्र (सजातीय) है जिसका ऐसा उदार (सर्वाभीष्टदेनेवाला) आपका वपु (शरीर) वचनके अगोचर है ॥ ३७ ॥

आश्रितरक्षानुकूलाधिराज्यसूचकासिकाविशेषविशिष्टां श्रियमनुसन्धत्ते—

आश्रितोंके रक्षासे अनुकूल आधिराज्यको सूचना करनेवाले आसनके ऊपर बैठी भयी श्रीजीको अनुसंधान करते हैं—

एकं न्यञ्च्य नतिक्षमं मम परं चाकुञ्च्य पादाम्बुजं
मध्येविष्टरपुण्डरीकमभयं विन्यस्य हस्ताम्बुजम् ।
त्वां पश्येम निषेदुषीं प्रतिकलं कारुण्यकूलङ्कष-
स्फारापाङ्गतरङ्गमम्ब मधुरं मुग्धं मुखं बिभ्रतीम् ॥ ३८ ॥

एकमिति। अम्ब हेश्रीः ! मम दासभूतस्य नतिक्षमं प्रणामयोग्यम् । एकं पादाम्बुजं दक्षिणं न्यञ्च्य सिंहासनादधः प्रसार्य परम् इतरत् वामपादाम्बुजम् आकुञ्च्य तिर्यगितिशेषः । अभयम् अभयसूचकम्, अभयदायि वा हस्ताम्बुजं मध्येविष्टरपुण्डरीकम् आसनपद्ममध्ये विन्यस्य निषेदुषीम् आसीनां कारुण्यकूलङ्कषस्फारापाङ्गतरङ्गं कारुण्येन दयया कूलङ्कषौ उत्कूलौ स्फारौ विशालौ अपाङ्गौ तरङ्गाविव यस्य तत्तथोक्तम् । मधुरं प्रियं भोग्यं वा । "स्वादु प्रियौ तु मधुरौ" इत्यमरः । मुग्धं सुन्दरम् । "मुग्धः सुन्दरमूढयोः" इत्यमरः । मुखम् आननं बिभ्रतीं त्वां प्रतिकलं सर्वकालं पश्येम सेवेमहि । विश्वरक्षणोपयुक्तसिंहासनावस्थितिविशेष एव ते सन्ततसेवनीयः संश्रितानामिति भावः ॥ ३८ ॥

हे अम्ब ! हमलोगोंके नमस्कार करनेके योग्य एक (दाहिने) चरणारविंदको सिंहासनसे नीचे लटकाकर तथा दूसरे (बायें) चरणारविंदको संकुचित (सकोड) कर तथा आसनपद्मके ऊपर अभयसूचक हस्त कमलको रखकर बैठी भयी और दयाके वेगसे किनारेको उलांघकर चलनेवाला विशाल कटाक्षरूप तरंग है जिसमें ऐसा परमप्रिय सुंदर मुखकमलको धारण करनेवाली आपको हम सर्व कालमें देखते रहें ॥ ३८ ॥

इत्थं श्रियं संसेव्य सेवाजनितप्रीत्या तत्पादौ शरणमुपगच्छति—

इस प्रकार लक्ष्मीजीकी सेवासे प्रसन्न होकर तिनके चरणकमलकी शरणागति करते हैं—

सुरभितनिगमान्तं वन्दिषीयेन्दिराया-
स्तव कमलपलाशप्रक्रियं पादयुग्मम् ।
वहति यदुपमर्दैर्वैजयन्ती हिमाम्भः-
प्लुतिभिरिव नवत्वं कान्तबाहान्तराले ॥ ३९ ॥

सुरभितेति—इन्दिरायाः परमैश्वर्यप्रदायास्तव कमलपलाशप्रक्रियं कमलपलाशानां प्रक्रिया रीतिर्यस्य तत् कमलदलसदृशांगुलीत्यर्थः । "पलाशः किंशुके पत्रे" इति विश्वः । सुरभितनिगमान्तं वासितवेदान्तं वेदान्तवेद्यमिति यावत् । पादयुग्मं वन्दिषीये अभिवादयेय स्तुवेय वा "वदि अभिवादनस्तुत्योः" इत्यस्माद्धातोर्लिङात्मनेपदोत्तमपुरुषे "इदितो नुम्" इति नुमागमे "लिङः सीयुट्" इति सीयुडागमे तस्य इडागमे षत्वे "इटोत्" इति इटः अदादेशे वन्दिषीयेति रूपम् । उत्तरार्धेन पादयुग्ममेव विशिनष्टि—वहतीति । वैजयन्ती वनमाला कान्ताबाहान्तराले प्रियवक्षसि यदुपमर्दैः यस्य पादयुगस्य उपमर्दैस्संघर्षैः हिमाम्भःप्लुतिभिरिव हिमसलिलसेचनैरिव नवत्वं नूतनत्वं वहति । अमृतस्यन्दिसुकुमारश्रीपादसंस्पर्शेन शोभातिशयं धत्त इति भावः ॥ ३९ ॥

कमलदलके सदृश अंगुली है जिसमें तथा सुवासित है वेदांत जिससे ऐसे आपके चरणकमलको हम अभिवादन करते हैं जिस चरणकमलके संघर्ष (मर्दन) से परमप्रिय नारायणके वक्षःस्थलमें वनमाला शीतल जलके सेचन (छिडकने) की नाईं नवीन बनी रहती है ॥ ३९ ॥

लक्ष्मीकटाक्षविग्रहवैलक्षण्यमनुसन्धत्ते—

श्रीजीके कटाक्षका विलक्षणता दिखाते हैं—

त्वत्स्वीकारकलावलेपकलुषा राज्ञां दृशो दुर्वचा
नित्यं त्वन्मधुपानमत्तमधुपश्रीनिर्भराभ्यां पतिम् ।
दृग्भ्यामेव हि पुण्डरीकनयनं वेदो विदामास ते
साक्षाल्लक्ष्मि तवावलोकविभवः काक्का कया वर्ण्यते ॥ ४० ॥

त्वदिति । हे लक्ष्मि ! राज्ञां लोकपालप्रभृत्याधुनिकपर्यन्तानां प्रभूणां । दृशो दृष्टयः त्वत्स्वीकारकलावलेपकलुषाः त्वत्स्वीकारकला त्वत्कटाक्षलेशः स्वीकारशब्देन सदयदृष्टिर्लक्ष्यते कलाशब्देनावयववाचिना लेशो लक्ष्यते, तेन जातेनावलेपेन गर्वेण, कलुषाः आविलास्सत्यः दुर्वचाः वर्णयितुमशक्याः भवन्ति, कवीनामिति शेषः । त्वत्कटाक्षलेशप्रसरणगर्वेण शोभाविशेषजुष्टाः प्रभुदृष्टयः कविवागगोचरा भवन्तीत्यभिप्रायः । किमुत लोकपालानाम् ? पत्युस्तव पुण्डरीकनयनत्वं च त्वद्विग्रहानुभवसमयसक्तविग्रहस्त्किमायत्तमित्याह—नित्यमिति । नित्यं सर्वकालं त्वन्मधुपानमत्तमधुपश्रीनिर्भ-

राभ्यां त्वन्मधुपाने त्वद्रूपमकरन्दपाने, मत्तमधुपयोः दृप्तषट्पदयोः श्रिया संपदा निर्भराभ्यां पूर्णाभ्यामेव यथा मधुपाने मत्तमधुपो नैश्चल्यं रक्ततां चानुभवति तथा मधुरूपत्वदनुभवे मधुपतुल्यनैश्चल्यरागसंपूर्णाभ्यामेवेत्यर्थः । दृग्भ्यां लोचनाभ्यां हेतुभूताभ्यां ते तव पतिं प्रियं वेदः "तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" इति च्छान्दोग्योपनिषद्रूपः । पुण्डरीकनयनं पुष्कराक्षं विदामास विज्ञातवान्खलु "विद् ज्ञाने" इत्यस्माद्धातोः "उषविद०" इत्यादिना आम्प्रत्यये " कृञ्चानुप्रयुज्यतेलिटि " इति अस्तेरनुप्रयोगे विदामासेति रूपम् । एवं सकललोचनातिशयस्य त्वदवलोकनाधीनत्वे त्वदवलोकसौन्दर्यं वर्णनातीतमित्याह–साक्षादिति । तत्र साक्षादवलोकविभवः कटाक्षसौन्दर्यं कया काका कीदृश्या भङ्ग्या वर्ण्यते न कयापीत्यर्थः ॥ ४० ॥

हे लक्ष्मि! आपकी दयादृष्टिके लेशसंबंधके वशसेही लोकपालोंसे लेकर अर्वाचीन राजाओंकी दृष्टियां कलुषित (श्रीमदमत्त) होजाती हैं और कवियोंके वर्णन करनेमें अशक्य होती हैं अर्थात् आपके कटाक्षलेशके विस्तारसे विशेष शोभावाली राजाओंके दृष्टियोंको वर्णन करनेमें कवियोंको कठिनाई पडती है लोकपालोंके दृष्टियोंको तो कहना ही क्या ? तथा सर्वदा आपके रूपमकरंदके पानसे पूर्ण शोभित नेत्रोंके कारण वेदने आपके पति नारायणको पुंडरीकाक्ष कहाहै । जब इस प्रकार संपूर्ण सुंदर नेत्रोंमें अतिशयत्व आपके कटाक्षके अधीन है तो साक्षात् आपका नेत्रसौंदर्य किस रीतिसे वर्णन कर सकतेहैं॥४०

पुनर्लक्ष्मीकटाक्षानेव वर्णयंस्तैस्स्वरक्षणं प्रार्थयति–

फिर श्रीजीके कटाक्षका वर्णन करते भये अपनी रक्षाकी प्रार्थना करते हैं–

आनन्दात्मभिरीशमज्जनमदक्षीबालसैरागल–
प्रेमार्द्रैरपि कूलमुद्वहकृपासंप्लावितास्मादृशैः ।
पद्मे ते प्रतिबिन्दुबद्धकलिकब्रह्मादिविष्कम्भकै–
रैश्वर्यौद्गमगद्गदैरशरणं मां पालयालोकितैः ॥ ४१ ॥

आनन्देति–हे पद्मे ! तव अत्र यद्यपि " युष्मदस्मदोरामंत्रितं पूर्वमविद्यमानवत् " इत्यामन्त्रितस्य अविद्यमानवद्भावेन त इत्यादेशो न संभवति । तथाप्यविद्यमानवद्भावस्यानित्यत्वं काशिकायामुक्तं " विद्यमानवच्चेतिवक्तव्यम " इति वार्तिकात् । युक्तञ्च तत् अत एव " भिक्षो ! ते

दयितास्ति किम् ! न हि न हि प्राणप्रिया कुण्डिका ''. इति महाकविप्रयोगः । अत एव च शुभकार्यारम्भे "लक्ष्मीपते ! तेऽङ्घ्रियुगं स्मरामि " इति सर्ववैदिकप्रयोगः । यद्वा पद्मेते पद्मं कमलम् इते प्राप्ते ! कमलवासिनीत्यर्थः । पद्मे लीलारविन्दे इता हस्ताभ्यां प्राप्ता पद्मेता तस्यास्संबुद्धिर्वा । आनन्दात्मभिः आनन्द एवात्मा स्वरूपं येषां तैरानन्दरूपैरित्यर्थः । ईशमज्जनमदक्षीबालसैः ईशस्य हरेः मज्जनेन स्वेष्ववगाहनेन यो मदस्तेन क्षीबैर्मत्तैः अलसैः मन्दैः आगलप्रेमार्द्रैः आगलम् आकण्ठम्, प्रेम्णा प्रीत्या आर्द्रैः शिशिरैरपि । अपिश्चार्थः । कूलमुद्वहत्कृपासंप्लाविताऽस्मादृशैः कूलमुद्वहया तीररोधिन्या उद्वेलयेत्यर्थः। कृपया संप्लाविताः स्नापिताः अस्मादृशा अकिञ्चना यैस्तैः । प्रतिबिन्दुबद्धकलिकब्रह्मादिविष्कम्भकैः प्रतिबिन्दु प्रतिकटाक्षलेशं बद्धकलिकाः ममायं कटाक्षलेशोऽस्तु ममायमिति बद्धकलहाः ब्रह्मादय एव विष्कम्भका निर्वाहका येषां तैः । विष्कम्भशब्दो नगररक्षार्थार्गलदण्डवाची तत्सादृश्यान्निर्वाहकसामान्ये गौणः । " तद्विष्कंभोऽर्गलं न ना " इत्यमरः । ऐश्वर्योद्गमगद्गदैः ऐश्वर्यस्य संपदः उद्गमेन उत्पादनेन गद्गदैः विलासातिशयेन स्खलितगतिभिः । आलोकितैः कटाक्षैः । भावे क्तः । अशरणं रक्षकान्तरशून्यं मां पालय " पा रक्षणे " इत्यस्माद्धातोः " हेतुमति च " इति णिचि " पातेर्णौ लुगागमो वक्तव्यः " इति लुगागमे पालयेति लोण्मध्यमपुरुषैकवचनम् ॥ ४१ ॥

हे पद्मे ! आनंदरूप तथा हरिके अवगाहनसे उत्पन्न जो मद तिससे मत्त अलस, और कंठपर्यंत प्रेमसे आर्द्र, तथा दोनों तटको उलांघकर चलनेवाली कृपा तिससे स्नान कर लिये हैं हमारे सदृश जन जिसमें, तथा एक एक कटाक्षके लेशको हमारा हमारा कहकर कलह करनेवाले ब्रह्मादिक हैं निर्वाहक जिसका और ऐश्वर्यके उत्पादनसे स्खलित है गति जिसका एतादृश विशेषण विशिष्ट जो आपका अवलोकन तिससे मेरे सदृश अनन्यगति (अन्य उपायशून्य) की रक्षा करो ॥ ४१ ॥

लक्ष्म्याः सौकुमार्यमनुसन्धत्ते—

अब लक्ष्मीजीकी सुकुमारताको अनुसंधान करते हैं—

पादारुन्तुदमेव पङ्कजरजश्चेटीभृशालोकितै-
रङ्गम्लानिरथाम्ब साहसविधौ लीलारविन्दग्रहः ।

दोला ते वनमालया हरिभुजे हाकष्टशब्दास्पदं
केन श्रीरतिकोमला तनुरियं वाचां विमर्दक्षमा ॥ ४२ ॥

पादेति । हे अम्ब श्रीः ! पङ्कजरजः पद्मरेणुः ते पादारुन्तुदमेव पादयोः पादतलयोः पादशब्देन पादतले लक्ष्येते । अरुन्तुदं कण्टक इव मर्मस्पृक् "अरुन्तुदन्तु मर्मस्पृक्" इत्यमरः । चेटीभृशालोकितैः चेटीनां सन्ततसहवासपरिचारिकाणां भृशालोकितैः अधिकवीक्षणैः अङ्गम्लानिः गात्रतान्तिः भवतीति शेषः । अथेति वाक्यान्तरारम्भे । "मङ्गलानन्तरारंभप्रश्नकात्स्न्येंष्वथो अथ" इत्यमरः । ते तव लीलारविन्दग्रहः लीलाकमलधारणं साहसविधौ साहसकर्मविधाने भवतीति सर्वत्रानुषज्यते । ते तव हरिभुजे प्रियवक्षसि भुजशब्देन तन्मध्यं लक्ष्यते । वनमालया वैजयन्त्या दोला दोलाविहरणं हाकष्टशब्दास्पदं हेति कष्टमिति च शब्दौ आस्पदं यस्य तत्कर्म भवति । अतिकोमला अतिसुकुमारा इयं अप्राकृता तनुर्विग्रहः केन केन हेतुना वाचां स्तुतिवचसां विमर्दक्षमा विमर्दस्य प्रतिपाद्यतया संघर्षस्य क्षमा योग्या भवति । न केनापीत्यर्थः । अतिसुकुमारस्य श्रीवपुषः पुरुषवचस्तवनमयुक्तमिति भावः ॥ ४२ ॥

हे अम्ब ! कमलका पराग आपके चरणारविन्दमें कांटेकी नाईं चुभता है और आपकी परिचारिकाओं (दासियों)के अधिक अवलोकन (नेत्रताप) से अंग कुम्हला जाता है इसप्रकार आपके अंगकी कोमलता है तब लीलाकमलका हस्तमें धारण आपका साहसही कहा जा सकताहै । हे श्रीः ! हरिके भुजाओंके बीचमें बनमालाके बोझसे श्रीजी दब न जांय इस भयसे नित्य मुक्तोंके हाकष्ट ऐसे शब्दोंका जो आस्पद (स्थान) है अथात् हरिके वक्षःस्थलमें वनमाला और लक्ष्मी दोनों हैं जब वनमाला किंचित् हिलतीहै तब लक्ष्मीजीके दबनेके भयसे नित्यमुक्तोंको हाकष्ट ऐसा शब्दकरानेवाली श्रीजीकी सुकुमारताहै यह भावहै । इस प्रकार अतिकोमल यह तनु किस हेतुसे स्तुति वाक्योंके द्वारा प्रतिपादन करनेके योग्य होसकतीहै ॥ ४२ ॥

अथ श्रियस्तारुण्यं वर्णयति—

इसके अनंतर श्रीजीकी तरुण अवस्थाका वर्णन करते हैं—

आमर्यादमकण्टकं स्तनयुगं नाद्यापि नालोकित-
भ्रूभेदास्मितविभ्रमा जहाति वा नैसर्गिकत्वायशः ।

सूते शैशवयौवनव्यतिकरो गात्रेषु ते सौरभं
भोगस्रोतसि कान्तदेशिककरग्राहेण गाहक्षमः ॥ ४३ ॥

आमर्यादमिति—हे श्रीः! ते तव स्तनयुगम आमर्यादं यावत्परिमाणम-र्यादम् अद्यापि अकण्टकं न किंतु सकण्टकं सप्रतिबन्धमेव स्तनपरिमाणपूर्ति-रद्यापि न जातेति भावः। पूर्णयौवन एव परिमाणपूर्तिः स्यादिति हृदयम्। आलोकितभ्रूभेदस्मितविभ्रमाः आलोकितस्य वीक्षणस्य भ्रूभेदस्य भ्रूभङ्गस्य स्मितस्य मन्दहासस्य विभ्रमा विलासा वा। वाशब्दश्चार्थः। नैसर्गिकत्वायशः स्वभाव-सिद्धत्वापयशः न जहति न मुञ्चन्ति। तारुण्यप्रयुक्तनेत्रादिलीलास्वतिचञ्चलाः सत्यः स्वभावप्रयुक्तत्वशङ्कामेवापादयन्ति न तु यौवनप्रयुक्तामिति भावः। भोग-स्रोतसि क्रीडाप्रवाहे कान्तदेशिककरग्राहेण कान्तः प्रिय एव देशिकः परिज्ञाता तस्य करग्राहेण हस्तावलम्बेन कान्तहस्तं गृहीत्वेति यावत्। गाहे अवगाहने क्षमो योग्यः मौग्ध्यातिशयात् एवं भोगः कार्य इति कान्तोपदेशसापेक्ष इत्यर्थः। शैशवयौवनव्यतिकरः शैशवस्य बाल्यस्य यौवनस्य युवत्वस्य च व्यतिकरः सन्धिः तारुण्यमित्यर्थः। ते तव गात्रेषु अवयवेषु सौरभं निरतिशयसौगन्ध्यं सूते जनयति तारुण्योदयात् कुचोदञ्चननेत्रविलासगात्रसौरभाणि सञ्जातानीति भावः ॥ ४३ ॥

हे श्रीः! अबतक भी आपका दोनों स्तन युवा अवस्थाके मर्यादापर्यंत नहीं पहुंचा और आपका अवलोकन, भ्रूभंग (भ्रुकुटियोंका हेरफेर) मंद-हासादिकोंका विलास अपने स्वभावसिद्ध अपयशको नहीं छोडा अर्थात् इनोंमेंसे तरुणावस्थाकी चंचलता नहीं गई और भोग प्रवाहमें भोरेपनसे परम-रसिक अपने कांतके हस्तावलंबन द्वारा संश्लेषमें समर्थ हैं इस प्रकार बाल्य और यौवन अवस्थाके मध्यकी तरुण अवस्थाकी गंध आपके अवयवोंमें अब तकभी है अर्थात् कुचकी उठान नेत्रोंमें चांचल्यादि वर्तमानहै ॥ ४३ ॥

श्रियो दिव्यमङ्गलविग्रहं पुष्पदामत्वेन वर्णयित्वा तस्य हरिवक्षःपरिष्कारतामा-साद्य सुकुमारतमं वपुषस्तथावर्णयन्तं स्वात्मानमुपालभते—

हरिके वक्षस्थलमें लागीहोनेके योग्य श्रीजीके दिव्य-मंगलविग्रहको पुष्प-माला निरूपण कारिके तिनकी सुकुमारताको वर्णन करनेवाले अपने आत्माको धिक्कारते हैं—

आमोदाद्भुतशालि यौवनदशाव्याकोचमम्लानिमत्
सौन्दर्यामृतसेकशीतलमिदं लावण्यसूत्रार्पितम् ।
श्रीरङ्गेश्वरि ! कोमलाङ्गसुमनःसन्दर्भणं देवि ! ते
कान्तोरःप्रतियत्नमर्हति कविं धिङ्मामकाण्डाकुलम् ॥४४॥

आमोदेति । हे देवि ! आमोदाद्भुतशालि आमोदाद्भुतेन अद्भुतसौगन्ध्येन । शालत इति शालि । " आमोदो गन्धहर्षयोः " इत्यमरः । यौवनदशाव्याकोचं यौवनदशया तारुण्येन व्याकोचं विकासि, इत्थंभावे तृतीया, कारुण्याभिन्नविकासमित्यर्थः । अम्लानिमत् अतान्तं सौन्दर्यामृतसेकशीतलं सौन्दर्यम् अवयवशोभैव अमृतं तस्य सेकेन व्याप्त्येत्यर्थः । शीतलं शिशिरं लावण्यसूत्रार्पितं लावण्यं समुदायशोभैव सूत्रं गुणः तस्मिन्नर्पितं प्रथितं लावण्यस्य सर्वावयवानुस्यूतत्वात् सूत्रत्वरूपणं ते तव कोमलाङ्गसुमनःसन्दर्भणं सुकुमारावयवपुष्पमालिका कान्तोरःप्रतियत्नं कान्तस्य हरेः उरसो वक्षसः प्रतियत्नं परिष्कारम् अर्हति । हरिवक्षोऽलङ्करणार्हं भवतीत्यर्थः । अकाण्डाकुलम् अकाण्डे अनवसरे आकुलं विवशं कविं मां धिक् निंदनीयम् । पुष्पापेक्षयानिरतिशयसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययुक्तलक्ष्मीवपुषः पुष्पदामत्वरूपणं .तस्य दनुजवृषविषाणोल्लिखितकठिनहरिवक्षःपरिष्करणत्वकल्पनं चायुक्तमिति स्वस्याकाण्डाकुलत्वं ततो निन्द्यत्वं चेति बोध्यम्। कठिनतमेऽपि हरिवक्षस्याश्रितलक्षणचापल्यात् सुकुमाराया अपि श्रियः स्थितिरुपपन्नैवेति मन्तव्यम् ॥ ४४ ॥

हे देवि ! अद्भुत सुगंधिसे व्याप्त तथा तरुण अवस्थाके विकाससे म्लानि (कुम्हलाना) रहित, तथा सौंदर्य अवयव शोभा रूप अमृतके छिड्कावसे शीतल और लावण्य (समुदायशोभा) रूप सूतसे गुंथा इस प्रकार आपका कोमल अंगरूप पुष्पोंकी माला हरिके वक्षस्थलमें लागी होनेके योग्य है परंतु पुष्पकी अपेक्षा निरतिशय सौंदर्य, सौगंध्य, सौकुमार्य, लावण्य विशिष्ट श्रीजीके वपुको पुष्पमालात्व निरूपण और उस मालाको कठिन हरिके वक्षस्थलमें लागीके योग्य इस प्रकारका कथन अयुक्तहै इस कारण अवसर न देखकर व्याकुल होनेवाले हमारे सदृश कवियोंको धिक्कारहै ॥ ४४ ॥

श्रियो भगवता सह सम्भोगशृङ्गारं वर्णयति—

भगवान्के संगमें श्रीजीका संभोग शृंगार वर्णन करतेहैं—

मर्मस्पृशो रसशिराः व्यतिविध्य वृत्तैः
कान्तोपभोगललितैर्लुलिताङ्गयष्टिः ।
पुष्पावलीव रसिकभ्रमरोपभुक्ता
त्वं देवि ! नित्यमभिनन्दयसे मुकुन्दम् ॥ ४५ ॥

मर्मेति । हे देवि ! मर्मस्पृशो मर्मस्पर्शिनीः रसशिराः रसनाडीः व्यतिविध्य वेधिताः कृत्वा वृत्तैः उद्भूतैः कान्तोपभोगललितैः सम्भोगविलासैः लुलिताङ्गयष्टिः मृदितगात्रयष्टिः सती रसिकभ्रमरोपभुक्ता रसिकभ्रमरेण रसास्वादनचतुरचञ्चरीकेण उपभुक्ता निपीतरसा पुष्पावलीव स्थिता त्वं मुकुन्दं प्रेयांसम् अभिनन्दयसे आनन्दयसि नयनहृदयानन्दकन्दलितं करोषीत्यर्थः ॥ ४५ ॥

हे देवि ! रसिक भ्रमरोंसे भोगी पुष्पपंक्तियोंकी नाईं अपने संभोगविलासोंसे मर्मको स्पर्श करनेवाली रसाशिराओंको स्पर्श करिके मर्दित तनुयष्टि होकर पुष्पपंक्तिकी सदृश रहनेवाली आप अपने प्राण वल्लभ हरिको आनंद देती हौ॥४५॥

श्रियो दिव्याभरणगणयोगकृतकान्तिविशेषमनुसन्धत्ते—

अब अनेक दिव्य आभरणोंसे आभूषित श्रीजीके दिव्यमंगल विग्रहका अनुसंधान करते हैं—

कनकरशनामुक्ताताटङ्कहारललाटिका-
मणिसरतुलाकोटिप्रायैर्जनार्दनजीविके ।
प्रकृतिमधुरं गात्रं जागर्ति मुग्धविभूषणै-
र्वलयशकलैर्दुग्धं पुष्पैश्च कल्पलता यथा ॥ ४६ ॥

कनकेति। हे जनार्दनजीविके ! श्रीरङ्गराजजीवनौषधि !कनकरशना स्वर्णमेखला स्वर्णसूत्रं वा मुक्ताताटङ्के मौक्तिककर्णपत्रे हारो मुक्ताहारः ललाटिका कनकमयं माणिक्यमयं वा तिलकं ललन्ती वा मणिसराः मणिमालिकाः तुलाकोटी मणिमञ्जीरौ एते प्रायाः प्रधानानि येषां तैः । मुग्धविभूषणैः सुन्दराभरणैः प्रकृतिमधुरं स्वभावरम्यं ते गात्रं वलयशकलैश्शर्कराखण्डैः दुग्धं यथा क्षीरमिव, पुष्पैः कल्पलता यथा कल्पवल्लीव च जागर्ति विशेषेण प्रकाशते ॥ ४६ ॥

हे जनार्दनजीविके—हरिके जीवन औषधि ! स्वर्णका कटिसूत्र, मुक्तामणिमय कर्णभूषण, मुक्ताहार, स्वर्णजटित वा मणिमय ललाटिका (ललाट-

भूषण) मणियोंकी माला, मणि मंजोर (नूपुर) आदि सुंदर विभूषणोंसे स्वाभाविक रमणीय आपका गात्र शोभित होता है जैसे मिश्री मिला हुआ दूध भोग्य होता है तथा पुष्पोंसे कल्पलता जिस प्रकार शोभित होती है इसी प्रकार अनेक दिव्य भूषणोंसे आपका अंग शोभित है ॥ ४६ ॥

"रूपाकारविभूतिमिश्च सदृशीम्" इत्युक्तरीत्या भगवतः परमसाम्यापन्नायाः श्रियः कौस्तुभवैजयन्तीपञ्चायुधधारणस्य साधारण्येऽपि तेषां भगवदेकधारणे हेतुमुत्प्रेक्षते—

कौस्तुभ, वैजयंती, चक्रादि पंचायुधोंका धारण हरि और श्रीजी इन दोनोंको साधारण है तो भगवान्‌ही क्यों धारण करते हैं ? इसका हेतु कहते हैं—

सामान्यभोग्यमपि कौस्तुभवैजयन्ती-
पञ्चायुधादि रमणः स्वयमेव बिभ्रत् ।
त्व (त) द्भारखेदमिव ते परिहर्तुकामः
श्रीरङ्गधाममणिमञ्जरि गाहते त्वाम् ॥ ४७ ॥

सामान्येति । हे श्रीरङ्गधाममणिमञ्जरि ! श्रीरङ्गधाम्नः हरेः दिव्यविमानस्य वा मणिमञ्जरी रत्नगुच्छिका रत्नदीपिका वा तस्याः संबुद्धिः । सामान्यभोग्यमपि युवयोरिति शेषः । सामान्येन साधारण्येन भोग्यमपि भूषणतया प्रहरणतया चधार्यमपि कौस्तुभवैजयन्तीपञ्चायुधादि कर्म आदिशब्देन परशुपरिघादि गृह्यते त्वद्भारखेदं त्वद्वहनायासं ते तव परिहर्तुकाम इवेत्युत्प्रेक्षा । स्वयमेव बिभ्रत्सन् त्वां गाहते संश्लिष्यति दिव्याभरणदिव्यायुधगणं वहन् प्रियस्त्वामनुसरतीति भावः॥४७॥

हे श्रीरंगधामणिमंजरि—श्रीरंगविमानमें रत्नोंकी गुच्छारूप ! आप दोनोंका सामान्यरीतिसे कौस्तुभ और वैजयंती तथा शंख, चक्र, गदा, खड्ग, शार्ङ्ग-धनुष आदि पांच आयुध भोग्य तथा प्रहारकरनेके योग्य हैं तौ भी आपके ऊपर इन भूषण आयुधोंके वहनका भारकी आशंकासे हरि आपही धारण करतेहैं और भारजन्य खेदको दूरकरनेकी इच्छासेआपका संश्लेष करते हैं ४७

"राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि । अन्येषु चावतारेषु विष्णोरेषानपायिनी" इत्युक्तरीत्या भगवतः तत्तदवतारानुगुणं श्रियोऽनवतारे भगवतो लीला न रोचत इत्याह—

भगवान्‌के अवतारोंके अनुरूप यदि श्रीजी अवतार न लें तो भगवान्‌की सब लीला विरस होजाय, सोई कहतेहैं—

यदि मनुजतिरश्चां लीलया तुल्यवृत्ते-
रनुजनुरनुरूपा देवि नावातरिष्यः ।
असरसमभविष्यन्नर्म नाथस्य मात-
र्दरदलदरविन्दोदन्तकान्तायताक्षि ॥ ४८ ॥

यदीति । दरदलदरविन्दस्य ईषद्विकसितपुण्डरीकस्य उदन्तो वृत्तान्तः तेन गर्भपत्रं लक्ष्यते तद्वत्कान्ते शोभमाने आयते विशाले अक्षिणी यस्यास्तस्याः संबुद्धिः । मातः जननि ! लीलया स्वेच्छया न तु कर्मणा, मनुजतिरश्चां मनुष्यतिर्यग्जन्तूनाम् इदमुपलक्षणम् सुरनरतिर्यक्स्थावरशरीरचतुर्विधात्मनामपि तुल्यवृत्तेः रामकृष्णमत्स्यकूर्मकुब्जाम्रादिरूपेण समानशीलस्य नाथस्य श्रीरङ्गराजस्य अनुजनुः प्रत्यवतारम् अनुरूपा रुक्मिण्यादिरूपेणानुरूपाकारा नावातरिष्यो यदि नावतरसि चेत् नाथस्य तस्य नर्म क्रीडा "क्रीडा खेला च नर्म च" इत्यमरः । असरसं विरसम् अभविष्यत् । तदवतारानुरूपमवतीर्य त्वदभिनन्दने सत्येव तस्य तन्नर्म प्रीत्यै भवेत् न चेन्नेति भावः ॥ ४८ ॥

हे दरदलदराविन्दोदन्तकांतायताक्षि ! किंचित् खिलेभये कमलके भीतर जो पत्र देखाजाताहै तिसके सदृश शोभायमान विशालहै नेत्र जिनकी हे मातः ! यदि देव मनुष्य तिर्यगादिकोंमें आप अपनी इच्छाहीसे सीता रुक्मिण्यादि रूपसे हरिके अवतारोंके योग्य अवतार न लो तो हरिका सब क्रीडा व्यर्थ होजाय अर्थात् हरिके अवतारोंके अनुरूप आपभी अवतार लेकर हरिके क्रीडा को सफल करतीहो ॥ ४८ ॥

संश्रितार्थं समुद्रमथनायासं भजतो भगवतः श्रमापनयनाय समुद्रादाविर्भूता-सीत्याह—

अपने आश्रितोंके अर्थ समुद्रमथन करनेवाले हरिके श्रमको दूर करनेके लिये समुद्रसे आप प्रगट भयी, सो कहतेहैं—

स्खलितकटकमाल्यैर्दोर्भिरब्धिं मुरारे-
र्भगवति दधिमाथं मथ्नतः श्रान्तिशान्त्यै ।
भ्रमदमृततरङ्गावर्ततः प्रादुरासीः
स्मितनयनसुधाभिः सिञ्चती चन्द्रिकेव ॥ ४९ ॥

स्खलितेति । हे भगवति षड्गुणैश्वर्यसम्पन्ने ! स्खलितानि प्रतिहतानि कट-

कानि वलयानि माल्यानि मालिकाश्च येषु तैर्दोर्भिः बाहुभिः अब्धिं क्षीरार्णवं दधिमाथं दधीव उपमानार्थे णमुल्प्रत्ययः । मथ्नतो मथनं कुर्वतः अमृतार्थमितिभावः । मुरारेः माधवस्य श्रान्तिशान्त्यै श्रमापनयनाय स्मितनयनसुधाभिः स्मितं मन्दहासः नयनान्यवलोकनानि नयनशब्देन अवलोकितानि लक्ष्यन्ते । तान्येव सुधाः ताभिः सिञ्चती सती चन्द्रिकेव भ्रमदप्लुततरङ्गावर्ततः भ्रमताम् उल्लोलानां अमृततरङ्गाणां सुधावीचीनाम् आवर्ततो वलयात् तत्सारतयेति भावः । तदुक्तं श्रीवत्सांकमिश्रैः—"उदधिगमन्दराद्रिमगिमन्थनलब्धपयोमधुररसेन्दिराहृदुधसुन्दरदोःपरिघम्" इति । प्रादुरासीः आविर्भूतासि यथा—जगत् सुधाभिः सिञ्चती चन्द्रिका पयोधेराविर्भवति तथा भगवन्तं स्मितनयनसुधाभिः सिञ्चती पयःपयोध्युल्लुठत्सुधातरङ्गावर्तात् त्वमाविर्भूतासीति भावः ॥ ४९ ॥

हे भगवति ! परस्पर कटक, माला आदि भूषणोंके चलायमान होनेसे टक्कर लग रहाहै जिसमें ऐसे अपने भुजाओंसे दधिमथनकी नाई अमृतके अर्थ समुद्रको मथन करनेवाले मुरारिके परिश्रमको दूर करनेके लिये मंदहास तथा सुंदर अवलोकनरूप अमृत छिडकावसे सींचतीहुई समुद्रमथनके वेगसे ऊपरको उछलतेहुए अमृतलहरोंके मध्यसे आप प्रगट भयी । जैसे अपने अमृतरूप किरणोंसे जगत्को सींचता भया चंद्रमा प्रगट हो तैसेही मंदहास अवलोकन आदि अमृतवृष्टियोंसे हरिको सींचती आप प्रगट होती भयी ॥ ४९ ॥

अथ भगवत्क्षमाया अपि लक्ष्मीक्षमामतिशयितामुदाहृत्य सा महापराधिनोऽस्मानानन्दयत्वित्याशास्ते—

अब इस श्लोकमें भगवान्के क्षमागुणसे श्रीजीके क्षमागुणका दृष्टांतसहित आधिक्य वर्णन करते हैं—

मातर्मैथिलि राक्षसीस्त्वयि तदैवार्द्रापराधास्त्वया
रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठी कृता ।
काकं तञ्च विभीषणं शरणमित्युक्तिक्षमौ रक्षतः
सा नः सान्द्रमहागसस्सुखयतु क्षान्तिस्तवाकस्मिकी ॥५० ॥

मातरिति । हे मातः निरुपाधिकजननि मैथिलि ! कृपैकमूर्त्तितया सीतावतारं कुर्वाणे श्रीरङ्गेश्वरि त्वयि त्वद्विषये, तदैव हनूमदागमनाव्यवहितपूर्वसमय एव, रावणस्य तदानीमेव नाशादिति भावः। तथैवेति पाठे तथैव रामराहित्येनेत्यर्थः।

१ तथैव इति च पाठः ।

रावणजीवनदशायां यथा तथैव तन्नाशदशायामपीति वार्थः । आर्द्रापराधाः रावणनाशापरिज्ञानाद्धनूमदागमनपर्यन्तमविरतापराधाः राक्षसीः एकाक्ष्यादिकाः । पवनात्मजात् तिर्यगुद्भूतात्स्वतो मर्कटात्, रक्षन्त्या पालयन्त्या एतेन बुद्धिशून्यत्व दुस्साध्यत्वञ्च व्यञ्जितम् । काकं काकासुरम्, तं 'विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः' इति प्रसिद्धविभीषणञ्च । शरणमित्युक्तिक्षमौ 'त्रीँल्लोकान् सम्परिक्रम्य तमेव शरणं गतः' 'त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः' इति शरणवरणोक्तिक्षमौ । रक्षतः पालयतः, उभयोः शरणवरणं रक्षणनिमित्तं सूचितम् । "वध्यं प्रपन्नं न प्रतिप्रयच्छति" इति श्रुतेः । रामस्य त्वत्प्रियस्य गोष्ठी परिषत्, लघुतरा लघीयसी कृता । रामो लघूकृत इति वक्तव्ये गोष्ठ्यां- तदुक्तिरपचारभिया रामस्य गुणपरिषद्वा । मंदबुद्धेर्दुस्साध्यान्निर्निमित्तमार्द्रापराध- रक्षणशीलया त्वया निमित्तमपेक्ष्य रक्षतो रामस्य गुणगोष्ठीलघूकरणं युक्तमिति तात्पर्यम् । सा आर्द्रापराधसहत्वरूपेण प्रसिद्धा । आकस्मिकी निर्हेतुका तव क्षान्तिः सान्द्रमहागसः निरन्तरमहापराधानस्मान् सुखयतु सुखिनः करोतु । सा क्षमैवास्माकमाश्वासहेतुरिति भावः । अत्र केचित्—'प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा' इति श्रीरामायणवचनेन लक्ष्मीक्षमाया अपि प्रणिपातहेतुकत्व- प्रतीतेराकस्मिकत्वं नास्तीति वदन्ति । तदापातप्रतीतिविलसितम्, तथा हि— कल्याणस्वप्नदर्शिन्या त्रिजटया मैथिल्याः श्रेयःकालः समागतस्तदेनां मा पीडयत प्रत्युत शरणं गच्छत रावणे हतेपि युष्मानियं रक्षिष्यतीत्युक्त्वा महा- पराधकारिणीरस्मान्कथं रक्षिष्यतीति तदाशङ्कां 'प्रणिपातप्रसन्ना हि मैथिली' इत्यौचित्यात्स्वबुद्ध्यैव परिहृतवती । नतु प्रणिपातप्रसन्नतामैथिलीधर्मः । अत एव रावणवधानन्तरमपि तद्वधापरिज्ञानेन हिंसमाना राक्षसीर्हनूमतो रक्षितवती । अत एव स्वविषये महापराधं काकासुरं विमुखपतितं भगवत्पादारविन्दयोर्योजितवती, अतस्साधूक्तमेव क्षान्तिस्तवाकस्मिकीति । एतच्छङ्कापरिहारावस्मदुक्तश्रीगुणसुधा— सारलहरीस्तोत्रे प्रदर्शितौ—"तव क्षान्तिं भट्टारकगुरुरवादीत्तव नुतावकस्मादुद्भूता- मिह जननि केचिज्जडधियः । प्रसन्ना हीत्युक्तेः प्रणिपतनतो मैथिलसुता सहेतु- स्सापि स्यादिति जगदुरापातमतितः ॥ स्वबुद्ध्यैव प्रोक्तं प्रणतसुमुखीति त्रिजटया न चैतद्धर्मस्ते नलिनदलनेत्रप्रियतमे । यदेकाक्षीप्रख्यायतबहुलहिंसानवधिकप्रवृ- द्धार्द्रागस्काः पवनतनयाद्रक्षितवती ॥" इति ॥ ९० ॥

हे मातः ! मैथिलि ! राक्षसराजपुरी लंकामें नित्य नवीन तथा हनुमानजीके देखते तर्जन भर्त्सन आदि घोर अपराध करनेवाली राक्षसियोंको आप अपनी विना शरणागति कियेही मारुतिसे अनेक हेतुदर्शक वाक्योंके द्वारा रक्षा करिके रघुकुलभूषण श्रीरामचंद्रकी गोष्ठी (सभा) को अत्यंत छोटी करदेती भयीं क्योंकि त्रिलोकीमें अपनी रक्षा ढूंढता हुआ काक जब श्रीरघुनाथजीके चरणकमलमें गिरकर शरणागति किया और स्वभावसे धर्मात्मा विभीषण पुत्र, दार, धनधान्य सबको त्यागकर जब शरणागति किये तब श्रीराघवने दोनोंकी रक्षा किया और आप केवल अपनी क्षमागुणकी प्रबलतासेही शरणागतिकी अपेक्षा नहीं करिके अपराधियोंकी रक्षा करती हो इस कारण निर्हेतुकी आपकी क्षांति हमारे सदृश महान् अपराधियोंको सुखी करो ॥ ५० ॥

अस्माकं भगवदुद्देश्यत्वं त्वत्सम्बन्धनिबन्धनम् । अतस्तद्दर्शनतदाश्रयणतत्कैङ्कर्यकरणतज्जनितानन्दबाष्पादीन्यस्माकमुपपद्यन्त इत्याह—

श्रीजीके संबंधसे भगवान् हमलोगोंको उद्देश्य हैं—

मातर्लक्ष्मि यथैव मैथिलजनस्तेनाध्वना ते वयं
त्वद्दास्यैकरसाभिमानसुभगैर्भावैरिहामुत्र च ।
जामाता दयितस्तवेति भवतीसम्बन्धदृष्ट्या हरिं
पश्येम प्रतियाम याम च परीचारान्प्रहृष्येम च ॥ ५१ ॥

मातरिति । हे मातः जननि ! ते तव मैथिलजनः यथा स्वीय इति शेषः । तेनाध्वना मार्गेण तद्वदित्यर्थः । वयमपि स्वीया इत्यर्थः । ततः किमित्यत्राह— त्वदिति । त्वद्दास्यैकरसाभिमानसुभगैः त्वद्दास्ये त्वत्कैङ्कर्ये एकरसो मुख्यप्रीतिः त्वदभिमानेन भगवत्कैङ्कर्येऽपि त्वत्कैङ्कर्यबुध्येत्यर्थः । सुभगैः शोभनैः भावैः अभिप्रायैः । जामातेति जनकश्रीविष्णुचित्तयोरिति शेषः । मैथिलजनाभिप्रायेण जनकोक्तिः । अस्मदभिप्रायेण श्रीविष्णुचित्तोक्तिः । तव दयित इति । भवतीसम्बन्धदृष्ट्या भवत्यास्सम्बन्धज्ञानेन । भूसत्तायामिति धातोः "लटः शतृशानचा" इति शत्रादेशे टगितश्चेति ङीपि भवतीति रूपम् । हरिं श्रीरामं श्रीरङ्गनायकञ्च । इहामुत्र च लीलाविभूतौ नित्यविभूतौ च पश्येम सदा दर्शिनो भवेम । प्रतियाम शरणं गच्छेम परीचारान् किङ्करवृत्तीः याम भजेम च प्रहृष्येम प्रकृष्टानन्दभावा भवेम, मैथिलजनः स्वप्रभुजनकजामातेति तव प्रिय इति च श्रीरामं यथोपचरन्ति तथा प्रपन्नजनकूटस्थत्वत्पितृविष्णुचित्तजामातेति त्वत्प्रिय इति च श्रीरङ्गराजं वयमुपचराम इति भावः ॥ ५१ ॥

हे मातः ! मिथिलापुरवासी जन जिस प्रकार आपकी प्रियप्रजा हैं उसी प्रकार हमलोगभी आपका स्ववस्तु (अपना) हैं और सदाके लिये हमलोगोंकी यही प्रार्थना है कि, आपके दास्यरसके अभिमानसे उत्पन्न जो सुंदर भाव तिन भावोंसे इस लीलाविभूति तथा नित्यविभूतिमें श्रीजनकराज तथा विष्णुचित्तके जामाता और आपका पति इस प्रकार आपके संबंधदृष्टिसे हरिको देखें तथा शरण जांय और कैंकर्य वृत्तियोंसे सेवन तथा आनंदानुभव करें । जैसे जनकराजका जामाता, आपका पति श्रीरघुनाथजी हैं तैसे इहां प्रपन्नजनकूटस्थ श्रीविष्णुचित्तका जामाता, गोदा (श्रीरंगनायकी) के पति श्रीरंगनाथ हैं इस संबंधसे हमलोग श्रीरंगनाथका सेवन करें ॥ ५१ ॥

" चन्द्रमा मनसो जातः " इत्युक्तरीत्या शीताशयेऽपि भगवति यावत्कालमविच्छिन्नमहापराधानस्मानवलोक्य मनाङ्निग्रहाभिमुखं मनः कुर्वति सति तदनुचितमिति तं ततः कर्मणो निवर्त्य वात्सल्यातिशयात्त्वमस्मान्स्वजनयसीत्याह—

'चंद्रमा मनसे उत्पन्न भया' इस प्रमाणसे भगवान्का हृदय शीतलहै तौभी अनादिकालसे विमुख होकर घोर अपराध करनेवाले जीवोंको देखकर जब कलुषित हृदय होकर भगवान् दंडदेनेका विचार करतेहैं तब आप सयुक्तिक वाक्योंसे भगवान्का प्रिय करदेतीहैं सो कहते हैं—

पितेव त्वत्प्रेयाञ्जननि परिपूर्णागसि जने
हितस्रोतोवृत्त्या भवति च कदाचित्कलुषधीः ।
किमेतन्निर्दोषः क इह जगतीति त्वमुचितै-
रुपायैर्विस्मार्य स्वजनयसि माता तदसि नः ॥ ५२ ॥

पितेति । हे जननि श्रीः ! त्वत्प्रेयान् तव प्रियः श्रीरङ्गराजः परिपूर्णागसि सम्पूर्णापराधे जने चेतनवर्गे पितेव पुत्र इति शेषः । हितस्रोतोवृत्त्या तत्कालाप्रियं पथ्यपर्यवसायि च हितं तदेव स्रोतः प्रवाहः तत्र वृत्त्या वर्त्तनेन हितैकपरत्वादित्यर्थः । "याचितोपि सदा भक्तैर्नाहितं कारयेद्धरिः" इत्युक्तेः । कदाचित् कदापि सन्ततमनुकूल एव सन् महापराधदर्शनेन कदापि समये कलुषधीः कुपितमनाः भवति च भवत्यपि न तु कुपितमनस्त्वं तस्य नैजमिति भावः । तद्दर्शिन्याः श्रियो व्यपारमाह—किमेतदिति । एतत् इदं कालुष्यं किं किंनिबन्धनम् अनुचितमित्यर्थः । अनुचितत्वमुपपादयति—निर्दोष इति । इह दोषैकाश्रये जगति लीलाविभूतौ निर्दोषः कः ? न कोपीत्यर्थः । एतद्विभूतिसम्बन्धेन हेयप्रतिभटस्य तवापि दोषः प्रसज्येदिति भावः । अतो दोषदर्शनेन तव मनःकालुष्यं न युक्तमित्येवं

प्रकारेण उचितैः अपराधक्षमापणयोग्यैः उपायैः आलोकालापनीवीश्लथनादिभिः विस्मार्य तस्य दोषादर्शित्वमापाद्य नः अस्मान् स्वजनयसि भगवतस्स्वत्वाभिमानगोचरान्करोषि । तत् तस्मात्कारणात् प्रियैकपरतयेत्यर्थः । त्वं मातासि पितुर्हितपरत्वं मातुः प्रियपरत्वञ्च सुप्रसिद्धं युवयोर्दृष्टमिति भावः ॥ ९२ ॥

हे जननि ! पिता हितपर और माता प्रियपर होती है इस कारण आपके प्रिय (हरि) परिपूर्ण अपराध करनेवाले जीवोंके हित (भलाई) की इच्छासे जबकभी कुपित होतेहैं तब आप पूछती हो कि हे भगवन् ! इस कोपका क्या कारण है ? तब हरि कहते हैं, यह अपराधी चेतन है । फिर आप कहती हो कि, इस प्रकारका विचार अनुचित है क्योंकि इस दोषाकर जगतमें निर्दोष कौन है ? किंतु कोई भी नहीं है इस प्रकार अपने अनेक सयुक्तिक वाक्योंसे भगवान्का ज्ञान शक्त्यादि गुणविमुखोंके विषय तथा वात्सल्य सौशील्यादि गुणोंको आश्रितोंके विषय करिके इन उचित उपायोंसे उसके अपराधको भुलाकर हरिके कालुष्यको दूरकरिके उसको भगवान्का प्रियजन करदेती हो इसका कारण यही है कि सब जगत्का स्वतः निरुपाधिक माता आप हो ॥ ५२ ॥

" परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥" "अन्येषु चावतारेषु विष्णोरेषानपायिनी" इति प्रमाणद्वयोक्तप्रकारेण संश्रितरक्षणाय श्रीश्रीशौ कृपास्वातंत्र्याभ्यां हेतुभ्यां लीलाविभूताववतीर्य सुकुमारवपुर्लेपनविरहक्लेशादिकमनुभूतवन्तावत एतत्कृपास्वातन्त्र्ये धिगिति तद्विग्रहप्रेमपारवश्यादाह—

अब इस श्लोकमें यह कहते हैं कि, साधुओंकी रक्षा तथा अधर्मियोंका नाश और सनातन धर्मको स्थापनके लिये हरि और तिनकी अनपायिनी (जिनका कभी संग न छूटे) श्री अपनी कृपा और स्वतंत्रतासे इस दुःखरूप संसारमें आश्रितोंकी रक्षाके लिये अनेक दुःखोंको सहती हैं इस कृपा और स्वातंत्र्यको धिक्कार हो, ऐसा कहते हैं—

नेतुर्नित्यसहायिनी जननि नस्त्रातुं त्वमत्रागता
लोके त्वन्महिमावबोधवधिरे प्राप्ता विमर्दं बहु ।
क्लिष्टं प्रावसु मालतीमृदुपदं विश्लिष्य वासो वने
जातो धिक्करुणां धिगस्तु युवयोः स्वातन्त्र्यमत्यङ्कुशम् ९३ ॥

नेतुरिति । हे जननि! श्रीः नेतुर्नायकस्य नित्यसहायिनी त्वम्, नः अस्मान् अकिंचनान् त्वत्स्थलासन्निहितान् वा त्रातुं रक्षितुम् त्वन्महिमावबोधबधिरे त्वद्वै-भवज्ञानशून्ये अत्र लोके लीलाविभूतौ आगता समवतीर्णा सती बहु अधिकम् विमर्दम् आयासं प्राप्ता गतवती । आयासप्राप्तिमुपपादयति—क्लिष्टमिति । मालती-मृदु जातिकुसुमसुकुमारं पदं पदद्वयम् ग्रावसु पाषाणेषु क्लिष्टं क्लेशं प्राप्तवत् । वने विश्लिष्य विरहं प्राप्य वासो जातः वर्तनं जातं नित्यानपायिनोः युवयोः पृथ-ग्वर्तनं जातम्। अत्यङ्कुशाम् अमर्यादाम विग्रहसौकुमार्यविरोधिनीं युवयोः करुणां प्रति धिगस्तु निन्दा भवतु । अत्यङ्कुशं स्वातन्त्र्यं च प्रति धिगस्तु निन्दा भवतु तदुभयप्रयुक्तत्वाद्युवयोरेतादृशक्लेशस्येतिभावः । सुकुमारभगवद्दिव्यमङ्गलविग्रहप्रेम-पारवश्यात् धिक् करुणां धिक् स्वातन्त्र्यमिति स्तोतुस्तदुभयनिन्दा युक्तैवेति मन्तव्यम् ॥ ५३ ॥

हे जननि ! नायककी सर्वदा सहचरी होकर आप हमलोगोंकी रक्षा करनेके लिये इस आपकी महिमा सुननेमें वधिर संसारमें अवतार लेकर नाना प्रकारके क्लेशोंसे तापित (पीडित) होती भयीं, मालती (चमेली) के पुष्पसेभी कोमल दोनों चरणारविंद वनवासमें कंकड पत्थर आदिकोंसे पीडित होते भये फिरभी वनवासमें कांतसे विश्लेशादि नानाप्रकारके दुःखोंसे दुःखित होती भयीं इससे कभीभी विश्लेष करके नहीं रहनेवाले आप दोनों जिस करुणा और स्वातंत्र्यके वश होकर अवतार लेते हैं उस करुणा और स्वातंत्र्यको धिक्कार होय जिस कारण इतने क्लेश उठाने पडते हैं (इस प्रकारकी उक्ति श्री और श्रीपतिके प्रेमातिशयसे है) ॥ ५३ ॥

संश्रितरक्षणोपयुक्तं श्रियः स्वाधीनपतिकात्वमाह—

श्रीजीकी प्राप्तिके लिये भगवान् समुद्रमथनादिक अनेक व्यापार करते हैं सो कहते हैं—

> अधिशयितवानाब्धिं नाथो ममन्थ बबन्ध तं
> हरधनुरसौ वल्लीभञ्जं बभञ्ज च मैथिलि ।
> अपि दशमुखीं (खं) लूत्वा रक्षःकबन्धमनर्तयत्
> किमिव न पतिः कर्ता त्वच्चाटुचुञ्चुमनोरथः ॥ ५४ ॥

अधीति । हे मैथिलि ! सीतावताराभेदानुसन्धानेन श्रीरङ्गनायक्या मैथिलीति सम्बोधनम् । असौ नाथः त्वत्प्रियः त्वच्चाटुचुञ्चुमनोरथः सन् त्वच्चाटुना त्व-

तिप्रयाचरणेन वित्तः संपन्नो मनोरथो यस्य स तथोक्तस्सन्। "तेन वित्तश्चुञ्चुप्चणपौ" इतिचुञ्चुप्प्रत्ययः। अब्धिमधि अब्धौ, "अधिशीङ्स्थासांकर्म" इतिसप्तम्यर्थे द्वितीया। शयितवान् शयनं कृतवान् त्वज्जननभवनप्रीत्येति भावः। तम् अब्धिम् ममन्थ मथितवान्। बबन्ध च सेतुना बद्धवांश्च। हरधनुः शिवकोदण्डं वल्लीभञ्जं वल्लीमिव, उपमानार्थे णमुल्प्रत्ययः। बभञ्ज च भङ्गं कृतवांश्च। दशमुखीं दशानां मुखानां समाहारं दशापि मुखानीत्यर्थः। लूत्वा छित्वा रक्षःकबन्धं रावणशरीरम् अनर्त्तयदपि नार्त्तितवांश्च अपिश्चार्थः। रणरङ्ग इतिशेषः। सर्वत्र त्वल्लाभायेति योज्यम्। अब्धिशयनतन्मथनहरधनुर्भञ्जनाब्धिबन्धनरक्षःकबन्धनर्त्तनानां क्रमेण वक्तव्यत्वेपि 'अत्यन्तभक्तियुक्तानां नैव शास्त्रं न च क्रमः' इति प्रमाणानुसारेण भक्त्यतिशयादत्र क्रमो नानुसंहितः। न परमिदमेव किन्त्वशक्यमपि कुर्यादित्याह—किमिवेति। पतिस्त्वत्प्रियः किमिव न कर्त्ता किं वा न कुर्यात् इवशब्दो वार्थः। अघटितं सर्वमपि कुर्यादेवेत्यर्थः। अत एवोक्तं हनूमता "यदिरामस्समुद्रान्तां मेदिनीं परिवर्त्तयेत्। अस्या हेतोर्विशालाक्ष्या युक्तमित्येव मे मतिः॥" इति। कर्तेति 'डुकृञ् करणे' इति धातोः कर्तरिलुट्॥ ५४॥

हे मैथिलि! यह श्रीरंगनाथ (हरि) आपकी प्राप्तिकी इच्छासे समुद्रके मध्यमें शयन किये फिर उस समुद्रको मथन किये तथा बांधे और आपहीके निमित्त शैवधनुषरूप-वल्लीको तोडे औरभी दशमुखवाले रावणके मस्तकको काटकर उसके कबंध (शरीर) को नचाये, इतनाही नहीं, किंतु पति आपके लाडप्यारकी इच्छासे क्या नहीं करसकते? अर्थात् सबकुछ करसकतेहैं॥५४॥

भगवतस्सर्वप्रकारविभवोऽपि लक्ष्मीविलासलवानुभवे न पर्याप्त इत्याह—

भगवान्‌को सब प्रकारका विभवहै तौभी लक्ष्मीजीके विलासमें निमग्न होतेहैं सो कहते हैं—

दशशतपाणिपादवदनाक्षिमुखैरखिलै-
रपि निजवैश्वरूप्यविभवैरनुरूपगुणैः।
अवतरणैरतैश्च रसयन्कमिता कमले
क्वचन हि विभ्रमभ्रमिमुखे विनिमज्जति ते॥ ५५॥

दशशतेति। हे कमले! ते तव कमिता नायको हरिः "सहस्रशीर्षा पुरुषः" "अनन्तबाहूदरवक्त्रनेत्रम्" इति श्रुतिस्मृत्युक्तप्रकारेण दशशतानि सहस्रसंख्याः पाणयो हस्ताः पादाश्चरणाः वदनानि मुखानि अक्षीणि नयनानि मुखानि

आदीनि येषां तैस्तथोक्तैः अनुरूपगुणैः त्वद्गुणानुरूपैः अखिलैः अन्यूनैः निजवश्वरूप्यविभवैः निजं स्वकीयम् नित्यं वा 'निजं नित्ये स्वके त्रिषु' इत्यमरः। विश्वरूपमेव वैश्वरूप्यम् विश्वरूपसम्बन्धि वा तस्य विभवैः अतिशयैरपि, अपिश्चार्थः। अतः तद्भिन्नैः वैश्वरूप्यविभवभिन्नरित्यर्थः। अवतरणैः वासुदेवादि-चातुर्व्यूहविरिञ्चिगिरीशमध्यवर्त्तिविष्णूपेन्द्रमत्स्यकूर्मादिरूपैश्च रसयन् अनुभवन् त्व-द्विभ्रममिति शेषः। क्वचन च क्वापि समुद्रे तुषारवदेकदेश इत्यर्थः। विभ्रमभ्रमिमुखे विलासावर्तगह्वरे विनिमज्जति निमग्नो भवति। न त्वेकदेशमपि प्रयातीत्यर्थः। विनि-पूर्वाट्टुमस्जोशुद्धावित्यस्माद्धातोस्सस्य जश्त्वेन दत्वे श्चुत्वे विनिमज्जतीति रूपम् ९९

हे कमले ! आपके नायक हरि सहस्रशीर्षादि वचनोंके अनुसार सहस्र पाणि, चरण, वदन, नेत्रादि अपने विश्वरूप संबंधि विभवोंसे तथा आपके गुणोंके अनुरूप अपने गुणोंसे और वासुदेवादि चार व्यूहोंसे तथा ब्रह्मा और गिरीशके मध्यमें विष्णु उपेंद्रादि तथा राम कृष्णादि मत्स्य कूर्मादि अनेक अवतारोंसे आपको अनुभव करते भये आपका विलास रूप आवर्त्त (भँवर) तिसके एकदेशमें डूब जाते हैं ॥ ५५ ॥

श्रियो दुग्धार्णवपरमपदश्रीरङ्गेषु नित्यवासे हेतुमाह—

क्षीरसमुद्र, परमपद तथा श्रीरंगक्षेत्रादिकोंमें नित्य निवासका हेतु कहतेहैं—

जननभवनप्रीत्या दुग्धार्णवं बहुमन्यसे
जननि दयितप्रेम्णा पुष्णासि तत्परमं पदम्।
उदधिपरमव्योम्नोर्विस्मृत्य मादृशरक्षण-
क्षममिति धिया भूयः श्रीरङ्गधामनि मोदसे ॥ ५६ ॥

जननेति। हे जननि श्रीरङ्गेश्वरि! जननभवनप्रीत्या जन्मगृहप्रणयेन दुग्धार्णवं क्षीराब्धिं बहुमन्यसे मानयसि, तत्र वासं विधत्स इत्यर्थः। बहुपूर्वाद्दिवादिपठितात् "मनु अवबोधने" इत्यस्माद्धातोर्दिवादिभ्यः श्यन्निति श्यन्प्रत्यये बहुमन्यस इति लण्मध्यमपुरुषैकवचनम्। तत् प्रसिद्धम् "तद्विष्णोः परमं पदम्" इति वेदान्त-विदितं परमं पदं परमव्योम दयितप्रेम्णा प्रियप्रीत्या प्रियगृहप्रीत्येत्यर्थः। पुष्णासि पोषयसि तत्र सान्निध्यं कुरुष इत्यर्थः। "पुष पुष्टौ" इति धातोः परस्मैपद-पठितात् श्नाप्रत्यये पुष्णासीति रूपम्। उदधिपरमव्योम्नोः दुग्धार्णवपरमपदयोः विस्मृत्य विस्मरणं कृत्वा तत्रस्थानां नित्यं सन्निहितेयमिति बुद्धिमुत्पाद्येत्यर्थः। 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी। मादृशरक्षणक्षममिति धिया

मादृशाकिञ्चनपालनयोग्यमिति बुद्ध्या भूयः पुनरतिशयेन वा श्रीरङ्गधामनि श्रीरङ्गनगरे दिव्यविमाने वा मोदसे मोदं भजसि । अत्र दुग्धार्णवं बहुमन्यसे परमपदं पुष्णासीत्युक्त्या श्रीरङ्गराजधामनि मोदस इत्यानन्दभजनोक्त्या संश्रितरक्षणोपयुक्तत्वेन श्रीरङ्गधाम्नस्तदुभयोऽप्यानन्दावहत्वव्यतिरेको व्यज्यत इति व्यतिरेकालङ्कारध्वनिर्वाक्यगतो द्रष्टव्यः ॥ ५६ ॥

हे जननि ! अपनी जन्मभूमिके प्रीतिसे क्षीरार्णवका आप बहुत मान करती हो इससे वहां निवास करती हो, और अपने प्राणप्रेष्ठ नारायणके प्रेमसे पतिके गृह परमपदका पालन करती हो अर्थात् पतिके प्रेमसे वहां भी रहतीहो और अपने पिताका गृह क्षीरसागर तथा पतिका गृह परमपद इन दोनोंका मनसे भुलाकर हमारे सदृश पामरजनोंकी रक्षाके निमित्त श्रीरंगधाममें सबके दृष्टिके गोचर होकर प्रसन्नता पूर्वक रहतीहो । इससे यह फलित भया कि जन्मभूमिके कारण क्षीरसमुद्रका मान और पतिके गृह परमपदका पोषण करतीहैं और अपने आश्रितोंके वात्सल्यसे श्रीरंगधाममें आनंदानुभव करतीहैं ॥ ५६ ॥

"अर्चावतारविषये मयाप्युद्देशतस्तव। उक्ता गुणा न शक्यन्ते वक्तुं वर्षशतैरपि ॥" इत्युक्तप्रकारेण सर्वावतारापेक्षया श्रियः श्रीरङ्गधामन्यर्चावतारे सर्वगुणानामतिशयितत्वमाह-

श्रीरंगधाममें अर्चावतारमें लक्ष्मीजीके सब गुणोंका अतिशय है सो कहते हैं—

औदार्यकारुणिकताश्रितवत्सलत्व-
पूर्वेषु सर्वमतिशायितमत्र मातः ।
श्रीरङ्गधाम्नि यदुतान्यदुदाहरन्ति
सीतावतारमुखमेतदमुष्य योग्यम् ॥ ५७ ॥

औदार्येति । हे मातः ! श्रीरङ्गेश्वरि ! औदार्यकारुणिकताश्रितवत्सलत्वपूर्वेषु औदार्यं स्वार्थनैरपेक्ष्येण परेष्टप्रापकत्वम्, कारुणिकता परदुःखासहिष्णुत्वम्, आश्रितवत्सलत्वम् आश्रितदोषभोग्यत्वम्, तानि पूर्वाणि प्रधानानि येषां तेषु गुणेष्विति शेषः । सर्वं गुणजातं श्रीरङ्गधाम्नि श्रीरङ्गनगरे दिव्यविमाने वा, अत्र त्वदीयार्चावतारे अतिशायितं अतिशयं प्राप्तम् । मातर्मैथिलीत्यादिना सीतावतारे क्षमादयाद्यतिशयवर्णनादत्र कथं ततोऽप्यतिशय इत्यत्राह—यदुतेत्यादिना । अन्यत् अर्चावतारादितरत् सीतावतारमुखं सीतावतारप्रभृत्यवतारम् अतिशयितगुणमुदाहरन्तीति यदेतत् अमुष्यार्चावतारस्य योग्यम् अभ्यासः । सर्वावतारेषु कारुण्यादिगुणव्यसनेन सर्वगुणातिशयवान् अयमर्चावतारः परिणत इति भावः ॥५७॥

हे मातः ! औदार्य (स्वार्थ रहित होकर दूसरेके मनोरथोंको प्राप्त करना) कारुणिकता (दूसरेके दुःखोंको न सहना) आश्रितवत्सलत्व (आश्रितोंके दोषोंको भोग्य मानना) आदि सब प्रधान गुणगण जो सीताजीके अवतारमें कहे वे सबभी श्रीरंगधाममें आपके इस आर्चावतारके योग्य हैं ॥ ५७ ॥

श्रियो वाङ्मनसागोचरमौदार्यं वर्णयति-

लक्ष्मीजीका औदार्यगुण वचन मनके अगोचर है सो कहते हैं-

ऐश्वर्यमक्षरगतिं परमं पदं वा
कस्मै चिदञ्जलिभरं वहते वितीर्य ।
अस्मै न किञ्चिदुचितं कृतमित्यथाम्ब
त्वं लज्जसे कथय कोयमुदारभावः ॥ ५८ ॥

ऐश्वर्यमिति । हे अम्ब श्रीरङ्गेश्वरि ! अञ्जलिभरं अञ्जलिरेव करतलयुगलयोजनमेव भरं त्वदभिप्रायेण गुरुतरभारं वहते, न तु तदधिकतया किञ्चिदस्तीतिभावः। कस्मै चित् कुलगोत्रवृत्तिशून्याय जन्तवे ऐश्वर्यम् ऐहलौकिकं पारलौकिकं च अक्षरगतिं कैवल्यं परमं पदं परमपुरुषार्थलक्षणभगवत्कैङ्कर्यं वा, वा शब्दश्चार्थः कैङ्कर्यं चेत्यर्थः। अथ कार्त्स्न्येन वितीर्य दत्वा अस्मै अञ्जलिभरवाहिने उचितं तद्भारवहनानुगुणं किञ्चित् किमपि न कृतमिति नोपकृतमिति त्वं लज्जसे व्रीडाविनम्रवदनासि। "ओलजी व्रीडायाम्" इति धातोर्लडात्मनेपदमध्यमपुरुषैकवचनम् । अयमुदारभावः कः लोकविलक्षणो वाचामगोचरवैभवश्चेत्यर्थः ॥५८॥

हे अंब ! आपके उद्देश्यसे अंजलिरूप भारको ढोवनेवाला (अर्थात् आपके लिये हाथजोडनेवाला) कुल गोत्र आचार शून्य कोईभी हो उसके लिये आप कैवल्य तथा परमपुरुषार्थवाला परंपद देकरभी 'अहो इसके योग्य मैंने कुछभी नहीं किया ' इस विचारसे आप मारे लज्जाके मस्तक नीचे करती हो, भला कहो तो यह किस उदारताकी सीमा हैं ॥ ५८ ॥

इतः परं श्लोकद्वयेन स्वनैच्यमनुसंधत्ते-

इससे आगे दो श्लोकोंसे अपनी नैच्यानुसन्धान करते हैं-

ज्ञानक्रियाभजनसम्पदकिञ्चनोह-
मिच्छाधिकारशकनानुशयानभिज्ञः ।
आगांसि देवि युवयोरपि दुस्सहानि
बध्नामि मूर्खचरितस्तव दुर्भरोऽस्मि ॥ ५९ ॥

ज्ञानेति। हे देवि ! 'अर्थे समर्थो विद्वान्' इत्युक्तेच्छाधिकारशकनानुशयानभिज्ञः इच्छा पुरुषार्थस्पृहा, अधिकारो नियोज्यत्वम्, शकनं कर्मानुष्ठानसामर्थ्यम्, अनुशयो विहिताकरणकृतानुतापः तेषामनभिज्ञः, अत एव ज्ञानक्रियाभजनसम्पदकिञ्चनः ज्ञानं ज्ञानयोगः क्रिया कर्मयोगः भजने भक्तिप्रपत्ती ता एव सम्पदैश्वर्यं तेनाकिञ्चनो दरिद्रोऽहं युवयोरपि अपराधैकोपहारयोर्भवतोरपि दुःसहानि सोढुमशक्यानि आगांसि भगवदपचार–भागवतापचारासह्यापचाररूपाणि बध्नामि समूहरूपेण सञ्चिनोमि, न केवलं त्वद्विषयानुकूल्याभावः प्रातिकूल्यपरिपूर्णश्चास्मीत्याशयः। ततः किमित्यत्राह–मूर्खेति । मूर्खचरितो बालिशव्यापारः, इदं हेतुगर्भविशेषणम् । मूर्खचरितत्वादहं वात्सल्यातिशयभाजोपि तव दुर्भरोऽस्मि सोढुमशक्यो भवामि । रक्षणविषयो नास्मीत्यर्थः ॥ ५९ ॥

हे देवि ! उत्तम पुरुषार्थोंमें स्पृहा तथा अधिकार, कर्मके अनुष्ठानमें शक्ति, वेदविहित अनुष्ठानोंके नहीं करनेसें पश्चात्ताप हमको नहीं है इसी कारण ज्ञान, कर्म, भक्ति, प्रपत्तिरूप ऐश्वर्य संपत्से मैं अकिंचन (दरिद्री) हूं अर्थात् कर्म, ज्ञान, भक्ति, प्रपत्तिसे (रहित हूं) इतनाही नहीं किंतु आप दोनोंसे भी न सहा जाय ऐसे भगवत्-भागवत-असह्यापचार रूप घोर पापोंको मैं इकट्ठा करता हूं आपके मनके अनुकूल आचरण तो कहां ? किंतु आप दोनोंके रोषजनक अपराधोंसे परिपूर्ण हूं इस प्रकार मूर्खोंके सदृश व्यापारवाला मैं आपके क्षमाका पात्र नहीं हूं ॥ ५९ ॥

उक्तं नैच्यमपि पूर्वाचार्यनैच्यानुकरणमात्रं न मनःपूर्वकं ततो निर्हेतुककृपयैव त्वं शरणमसीत्याह–

पूर्व श्लोकमें कही नीचता पूर्वाचार्योंके वचनोंका अनुकरणमात्र है मनसे नहीं, इससे आप अपनी निर्हेतुक कृपासेही हमलोगोंका शरण हो–

इत्युक्तिकैतवशतेन बिडम्बयामि
तानम्ब सत्यवचसः पुरुषान्पुराणान् ।
यद्वा न मे भुजबलं तव पादपद्म–
लाभे त्वमेव शरणं विधितः कृतासि ॥ ६० ॥

इत्युक्तीति । हे अम्ब श्रीरङ्गेश्वरि ! इति पूर्वोक्तप्रकारेण एतत्सजातीयतया वा उक्तिकैतवशतेन कपटनैच्यवचनसहस्रेण तान् भगवन्निर्हेतुककटाक्षैकलब्धविशदतमज्ञानतया प्रसिद्धान् सत्यवचसो यथार्थवाचः, प्रामाणिकानित्यर्थः । पुराणान् पूर्वाचार्यान् पराङ्कुशपरकालयामुनयतिवरादीन् विडम्बयामि अनुकरोमि 'न धर्म-

निष्ठोऽस्मि, मनोवाक्कायैः, सत्कर्म नैव किल किञ्चन सञ्चिनोमि' इत्यादितत्तन्नैच्यानुसन्धानवदहमपि नैच्यानुसन्धानं करोमीत्यर्थः । पराङ्कुशादिनैच्यानुसन्धानं भाषान्तरत्वान्न सूचितम् । तन्नैच्यानुकरणमात्रेण मद्रक्षणं कार्यमित्याशयः । रक्षणे हेत्वन्तरमाह—यद्वेति । यद्वा नोचेत् तव पादपद्मलाभे त्वच्चरणारविन्दसम्प्राप्तौ मे भुजबलं न मत्सामर्थ्यसाध्यं किञ्चिदपि नास्ति । किन्तु विधितः त्वन्निर्हेतुककृपया ' ईशेशितव्यसम्बन्धादनिदं प्रथमादपि' इत्युक्तनिरुपाधिकेशेशितव्यसम्बन्धनियतेर्वा त्वमेव शरणम् उपायः कृतासि । विधितः कुतोपीति पाठे निर्हेतुकादित्यर्थः । तदा शरणमित्यनन्तरमिति शेषः । विधिशब्दः कृपावाचित्वेन श्रीपरांकुशैः द्रविडोपनिषत्पञ्चमशतकाद्यगाधातृतीयचरणे प्रयुक्तः व्याख्यातश्च तथा कलिमथनदेशिकैः ॥ ६० ॥

हे अम्ब ! पूर्वोक्त वचनोंके अनुसार हजारहों कपटगर्भित नैच्य वचनोंसे भगवान्के निर्हेतुक कटाक्षसे प्राप्त ज्ञानवाले सत्यवादी परांकुश, परकाल, यामुनमुनि, यतिवरादि पूर्वाचार्योंको भैं विडंबन (अनुकरण) करताहूं इस अनुकरणसे भी मैं रक्षाके योग्य हूं, यद्वा आपके चरणारविंदकी प्राप्तिमें हमारा भुजबल असमर्थ है तौभी निरुपाधिक स्व-स्वामी-प्रभृति विशेष संबंधोंके कारण आप हमलोगोंका शरण निर्मित हो अर्थात् इस विशेष संबंधसे ही हमलोगोंकी आप रक्षा करो ॥ ६० ॥

दृष्टादृष्टे उभेऽपि श्रीमुखतः प्रार्थयन् स्तोत्रं परिसमापयति—

इस लोक तथा परलोक दोनों सुखकी श्रीजीसे प्रार्थना करते स्तोत्रकी समाप्ति करतेहैं—

श्रीरङ्गे शरदः शतं सह सुहृद्वर्गेण निष्कण्टकं
निर्दुःखं सुसुखं च दास्यरसिकां भुक्त्वा समृद्धिं पराम् ।
युष्मत्पादसरोरुहान्तररजस्स्याम त्वमम्बा पिता
सर्वं च त्वमपि त्वमेव भव नः स्वीकुर्वकस्मात्कृपाम् ॥ ६१ ॥

श्रीरङ्ग इति । हे श्रीरङ्गेश्वरि श्रीरङ्गे दिव्यनगरे शतं शरदः "शतायुः पुरुषः" इति श्रुत्युक्तप्रकारेण शतमपि वत्सरान् ' कालाध्वनोरत्यन्तसंयोगे द्वितीया' । सुहृद्वर्गेण सह पुत्रपौत्रबन्धुशिष्यप्रशिष्यादिभिः समं निष्कण्टकं निरुपद्रवं निर्दुःखं दुःखासंस्पर्शं सुसुखम् सुतरां सौख्यं च यथा भवति तथा दास्यरसिकां त्वत्कैङ्कर्यरसज्ञां परां सर्वोत्कृष्टां समृद्धिं श्रीरङ्गश्रियं भुक्त्वा अनुभूय, एवं दृष्टमुक्त्वा अदृष्टमाशास्ते—युष्मदिति । युष्मत्पादसरोरुहान्तररजः युवयोः

पादपद्मगर्भरेणुः स्याम भवेम, युष्मच्चरणकमलकैङ्कर्यैकभोगा भवेमेत्यर्थः । एवं श्रियो दृष्टादृष्टप्रदाने हेतुमाह–त्वमित्यादिना । त्वमम्बा त्वमेव माता त्वमेव पिता त्वमेव जनकः अब्भक्षो वायुभक्ष इतिवत् त्वमित्यवधारणगर्भः, त्वमेव भव इत्युपरितन एवकारो वानुकृष्यते । सर्वविधोपि बन्धुस्त्वमेवेत्यर्थः । ननु मम सर्वबन्धुत्वेपि मत्प्राप्त्युपायाननुष्ठाने तव कथं मत्प्राप्तिसिद्धिरित्यत आह–सर्वमिति । त्वमेव नः अस्माकं सर्वमपि धर्ममलौकिकश्रेयःसाधनं कर्मज्ञानभक्तिप्रपत्त्यादिकं भव, 'स्याद्धर्ममस्त्रियां पुण्यम्' इत्यमरः।सर्वधर्मस्थाने पुरुषकारतया त्वमेव स्थित्वा सिद्धोपायेन भगवता मदिष्टं प्रापयेत्याशयः । त्वयि गुणलेशाभावे कथं मम तथाभाव इत्यत आह–स्वीकुर्विति।अकस्मात्कृपां निर्हेतुकदयां स्वीकुरु अङ्गीकुरुष्व, मद्गुणलवनिरीक्षणे कृपाया निर्हेतुकता न सिध्येदिति तदनपेक्षमेव मां रक्षेति भावः ६१

इति श्रीवत्सकुलतिलकस्य वीरराघवाचार्यस्य कृतिषु श्रीगुणरत्नकोशव्याख्यानम् ।

हे श्रीरंगेश्वरि ! अपनी आयुपर्यंत इस श्रीरंगधाममें पुत्र, पौत्र, बंधु, शिष्य, प्राशिष्योंके सहित निष्कंटक (निरुपद्रव) दुःख रहित, सुखी होकर आपकी दास्यरस रूप उत्तम समृद्धिको भोग करिके मैं आपके चरणारविंदका रज होऊँ अर्थात् आपका कैंकर्यही हमारा परम भोग्य होवो । इस प्रकार प्रार्थना करिके अब ऐहलौकिक पारलौकिक फलका हेतु कहतेहैं कि, अब तुमही माता पिता आदि सर्वविधबंधु होवो अथवा कर्म ज्ञान भक्ति प्रपत्ति आदिक हम लोगोंके लिये अपनी प्राप्तिका साधन अर्थात् सिद्धोपाय आपही होवो । कदाचित् कहो कि, तुम्हारेमें गुणका लेशभी नहींहै किस प्रकार हम तुम्हारे उपाय होवें ? तब कहतेहैं कि, केवल अपनी निर्हेतुकी कृपाका अवलंब कर हमको अंगीकार करो, हमारे गुणके ओर दृष्टिकरती तो कृपामेंभी निर्हेतुकता नहीं सिद्ध हो सकती, इसकारण किसी प्रकारकी अपेक्षा नहीं करिके हमारी रक्षा करो ॥ ६१ ॥ इति श्रीगुणरत्नकोश भाषाटीका समाप्ता ।

समाप्तोयं ग्रन्थः ।

पुस्तक मिलनेका ठिकाना–

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम् प्रेस,
कल्याण–बंबई.

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम् प्रेस,
खेतवाडी–बंबई.